MSS No. 157 Subject Religion

Name of MSS अध्यात्म रामायण बालकाण्ड

Author — —

Period n. d. Folios 045 (002 to 046)

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios 001

[illegible]

157

[illegible]

[illegible]

(3)

157

श्री
प्र रा
बा टी
१

ॐश्रीगणेशायनमः ॥ विसेनवंशजयोद्ग्रणीः शीतकरोपरः क्ष्माह्लादकोविस्वभूषणाःके
त्तभोपरः अत्रविस्वभूषणाख्येनपरमभक्ततया सदाभगवद्धृदयाहृद्धतास्यधनिता १ नाम्ना
हिम्मतिर्माभूद्वैर्येणोहिमवानिव रूपेणाजितकंदर्पः तमयोदतमयासमः २ प्रताक्षेसेज्ञो
नःसाक्षात्तेजसाभानुमानिव भूपानांभ्रष्टराज्यानांपुनःराज्यप्रदायकः ३ यंदृष्ट्वार्थिम्
हस्य जातेयंतिसुस्थितामतिः हित्वापश्वतंत्रीकंचकामधुक्भूमिमागता ४ तस्माज्जातो
रामदत्तंहाख्योदिद्वापरः मित्राणांचविपूर्णाचमानदःप्रार्थितःप्रभुः ५ मा
नदमानदातामानखेडकखत्तसदा ग्रामसमृद्धंतमादेवीयत्कीर्त्याधवली
कृता हिमाचलस्यसमतांनीताःसमापिचाचलाः ६ यद्भानो
र्भुप्रबाहेणोसेचोदस्यानपेक्षकाः कृषीबलाःप्रतिदि
नंप्रहृष्यन्तिदिनेदिने ७ तेनश्रीरामभक्तेनसर्वावि
द्याःप्रजानता शृंगवेरपुरेशानदिप्रकत्तदवाप्ति
ना ८ अर्थितोकल्पहृदेणविद्वज्जनसभासदा भ
ट्टनारोपणाधीश्वेणावध्येतेरामवर्मणा ९ प्रणा
म्यजानकीजानिंरामंकामातिसुंदरं चापबाण
धरंदेवंमायामानुषविग्रहम् १० ॥ रामः॥

सेतुः परोपकृतये ध्यात्मरामायणं बुधौ स्वबाहुमणिभिः स्वदैः प्रीयतां तेन राघवः ॥ श्रीम
तो वाल्मीकिना लोकोद्धाराय चकृते रामचरित्रं वर्णनरूपेण रामायणाख्यकाव्येन भगवतो ली
लावतारस्य रामस्य रावणादीनां दुष्टमनुष्यत्वबुद्ध्येन दवदात्मस्वरूपगोपतेनाख्य वहृत्तः स्वरूपं वाल्मी
किना उक्तमेव तत्र तत्र निरूपितेतद्देन तत्परमदयालु भगवान् साक्षाद्वेदव्यासो लोकानां स्फुटं बोधयितुं ना
रदब्रह्मसंवादरूपेण ब्रह्माण्डपुराणे ध्यात्मरामायणाख्यसंहितां चक्रे तस्याश्च वाल्मीकिमहाचिन्तार्थत्वा
एकं त्वबोधयितुं वाल्मीकिरामायणवदेव कांडसर्गोपेततां कृतवान् तां यथामति स्वमतिदोषस्व

ॐ श्रीगुरुमूर्तये नमः ॥ ॐ अप्रमेयत्रयातीतनिर्मलज्ञानमूर्तये मनोगिरां वि
दूराय दक्षिणामूर्तये नमः ॥ सूत उवाच कदाचिन्नारदो योगी परानुग्रहवांछ
या पर्यटन्सकलांल्लोकान्सत्यलोकमुपागमत् २ ॥ ॥

द्वयेव्याचक्ष्महे तामेनां संहितां नैमिषेरण्ये नैमिषीयान् ऋषीन् श्रावयति स्म सूतः तत्रादौ अप्र
मेयेति अप्रमेयं त्रयं मायाजीवेश्वररूपं तदतीतं तेभ्योधिकं ज्ञानं निर्मलं यत् ज्ञानं तत्स्वरूपाय
नमः मनोगिरां विदूराय वाङ्मनसागोचरायेत्यर्थः १ सूत उवाचेति कदाचिदिति योगी योगयु
क्तकषायतया विदितवेदितव्यः तादृशस्य पर्यटनविफलत्वं अत आह परेति परेषां तत्तल्लोकवासि
नाम् अधर्मज्ञानां उपदेशेन योनुग्रहस्तं दिदृक्षयेत्यर्थः सत्यलोकं ब्रह्मलोकं २ ॥ ॥ ॥ ॥

श्री
ग रा
वा टी
२

तत्रसत्यलोके मुनिपुंगवो नारद उत्तमानशुणां चतुर्मुखं विंहस्त्रा दृष्ट्वेति प्रमिसन्नतीयेस्मो
कस्येनसंबंधः मूर्तिमद्भिः गृहीतविग्रहैः छंदोभिर्वेदैः परितो वेष्टितं ततश्छेदार्थं त्वमेव
संप्रत्येव तत्वेदमूर्त्तित्वमस्यानादिति भावः बालार्कप्रभया बालानां सहस्राणां स्वप्रभया ३ स
र्वार्थगोचरज्ञानं अतीतानागतवर्तमानरूपाये सर्वेर्थास्तद्विषयज्ञानमयुक्तं बहुव्रीहिसमा

तत्र दृष्ट्वा मूर्तिमद्भिश्छंदोभिः परिवेष्टितं बालार्कप्रभया सम्यक्भासयंतं स्व
भासुरं ३ मार्कंडेयादिमुनिभिः स्तूयमानं मुहुर्मुहुः सर्वार्थगोचरज्ञानं सरस्व
त्यासमन्वितं ४ चतुर्मुखं जगन्नाथं भक्ताभीष्टफलप्रदं प्रणम्य दंडवद्भक्त्या
तस्थौ मुनिपुंगवः ५ स तु दृष्ट्वा मुनिं प्राह स्वयंभूर्वै सनातनम् किमर्थमागतो
त्वमसि तद्वदिष्यामि ते मुने ६ इत्याकर्ण्य वचस्तस्य मुनिर्ब्रह्माणमब्रवी
त्‌तः श्रुतं मया सर्वं पूर्वमेव शुभाशुभं ७॥

सः अतएव ततज्ञानरूपया सरस्वत्या व्याघ्रातया युक्तं ४ जगन्नाथं जगत्स्वामिनं भक्ताभी
ष्टफलप्रदत्वेन प्रसन्नया प्रणतास्त्वतेन ५ स्वयंभूरित्यनेन नानाकृतज्ञानं व्यक्तिं वै सनातनं
सर्वभूतेभ्यः पूर्वं अहमेवासमात्मनः भूतानि भगवत्यात्मन्येव भागवतोत्तम इत्युक्त
लक्षणं ततपूर्वं ब्रह्मासृष्टेः ६ शुभं विहितं अशुभं निषिद्धं ७ ॥ २

एकमेव पुण्यहीनानां परलोकप्राप्त्युपायहृर्षतं तद्रहस्यमपि मत्तः शृणु इति अन्नग्रहः परोपकारका
रणाज्जपुण्येनापयुज्यतामित्येवं हृष्टाद्ययायदिमयीत्यर्थः ८ दुराचाररताः निषिद्धकर्मनिरताः
तस्यैवमपंचः सत्यवार्तेति नानृतं वदेदिति निषिद्धानृतभाषणशीला इतियावत् ९ १० सर्वपा
पस्य मूलकारणमाह देहात्मदृष्टय इति देही एवात्मदृष्टिर्येषां ते इत्यर्थः एवंच देहनाशात्मा
नोनाशात् पापपुण्यफलभोक्तुरभावात् यादृष्टीनां विहिताकरणनिषिद्धकरणयोः प्रवृत्तिरिति
भावः स्थूलोहं गौरोहमिति प्रतीतिस्तु शुक्तौ रजतप्रतीतिवद्भ्रम इति तत्त्वं देहस्य परिणामित्वेन प्रति

॥ इदानीमेकमेवास्ति श्रोतव्यं सारमद्भुतं तद्रहस्यमपि ब्रूहि यदि ते त्वनुग्रहो मयि प्रामे
कलियुगे घोरे नराः पुण्यविवर्जिताः दुराचाररताः सर्वे सत्यवार्तापराङ्मुखाः ९ प
रापवादनिरताः परद्रव्याभिलाषिणः परस्त्रीसक्तमनसः परहिंसापरायणाः १० ॥
देहात्मदृष्टयो मूढा नास्तिकाः पशुबुद्धयः मातापितृकृतद्वेषाः स्त्रीदेवाः कामकिंकराः ॥
विप्रा लोभग्रहग्रस्ता वेदविक्रयजीविनः धनार्जनार्थमभ्यस्तविद्यामदविमोहिताः १२

तु गुणोपचयापचयाभ्यां प्रत्यक्षसिद्ध आत्मनो विनाशित्वेन अविनाशी वा देयमात्मेति स्मृतिसि
द्धे प्रतरावनास्तिका नास्ति परलोक इति बुद्धिमन्तः पशुबुद्धयः आहारविहारमात्रपरा विधिप्र
तिषेधानभिज्ञा इत्यर्थः स्त्रीदेवाः स्त्रीजिता इत्यर्थः तेषामन्नस्याभोज्यत्वेच स्मृतिः उक्ते कामकिं
कराः काम्यकर्ममात्रपराः ११ लोभरूपग्रहेण भूतादिना ग्रस्ताः वेदविक्रयजीविनः भृतकाध्या
पना धनार्जनफलकतया अभ्यस्तया विद्यया तन्मदेन तद्गर्वेण विमोहिताः इतरावत्ताशीलाः १२ ॥

श्री
ग्र. ग्रा.
वा. टी.
३

त्यक्तेति ग्रन्थविस्तारः त्यनुवर्तते त्यक्तं स्वजातिकर्म ब्राह्मणानामुचितं कर्माध्ययनादि यैस्ततः परवंचकाः
परवंचनार्थेव धर्मानुष्ठानवंतः क्षत्रियादयोप्येवमेवेत्याह क्षत्रियाइति स्वधर्मत्यागरूपं शी
लं येषां ते तथा कदाचिदपि धर्मशीला इत्यर्थः १३ ब्राह्मणाचारतत्परा इत्यनेन धर्मसंकरो दर्शि
तः स्त्रियश्च त्यनेनैव वर्णसंकरो दर्शितः भर्तृवंचनानेनिर्भया निःशंकाः भर्तृवंचनेति पदे बहिर्भा

त्यक्तस्वजातिकर्माणः प्रायशः परवंचकाः क्षत्रियाश्च तथा वैश्याः स्वधर्मत्यागशी
लिनः १३ तद्वच्छूद्राश्च ये केचिद् ब्राह्मणाचारतत्पराः स्त्रियश्च प्रायशो भ्रष्टा भर्तृ
वंचननिर्भयाः १४ श्वश्रूश्वशुरद्रोहकारिण्यो भविष्यन्ति न संशयः एतेषां नष्टबुद्धीनां
परलोककथं भवेत् १५ इति चिंताकुलं चित्तं जायते मम संततं लघूपायेन येन
नेषां परलोकगतिर्भवेत् १६ तमुपायमयाख्याहि सर्वं वेत्ति यतो भवान् इत्यृ
षेर्वाक्यमाकर्ण्य प्रत्युवाचाम्बुजासनः १७ ॥

गुरुरित्यनेनावस्यादेरकारस्य लोपः १४ १५ परलोकगतिः भूर्लोकोर्ध्वं भुवर्लोकादिब्रह्म
लोकांतगमनं तच्च दुराचारादिजातदोषनिवृत्तिं विना चित्तशोधकसत्धर्मं विना च दुःप्राप
मिति भावः १६ तत्कीदृशोपायज्ञानेन मम कथं स्यादिति चेत्तत्राह सर्वं वेत्तीति यतो भवान् स
र्वज्ञ इति भावः ऋषेर्नारदस्य वाक्यमाकर्ण्य अम्बुजासनो ब्रह्मा प्रत्युवाचेति सूक्तिः १७ ॥

साधुसर्वजनहितंयतः पृष्टमतः साधरंवत्येतद्भवतामितिशेषः तच्छृणुतदेवाहत्रिपुरेति त्रिपुरहं
तारंशिवंभक्तवत्सलेत्यनेनपार्वतीप्रश्नोपिस्वभक्तसकलजनकरुणायाद्भुवार्थंइतिसूचितं ९
गूढत्वातिविज्ञातौतद्वत्स्यमानंवत्स्यव्याख्यातवान् कथितवानित्यर्थः ९९ तान्किंतत्राह पुराणो
त्तममितिपुराणामनादित्वात उत्तमं श्रवणेनसर्वधर्मज्ञानकत्वाच्चित्तशुद्धिद्वारातत्त्वज्ञानजनक

साधुपृष्टंत्वयासाध्वीवक्ष्येतच्छृणुसादरं पुरात्रिपुरहंतारंपार्वतीभक्तवत्सलः ९
श्रीरामतत्त्वजिज्ञासुः प्रपच्छविनयान्विता प्रियायैगिरिशस्तस्यैगूढंव्याख्यातवान्
स्वयं ९९ पुराणोत्तममध्यात्मरामायणमितिस्मृतं तत्पार्वतीजगद्धात्रीपूजयित्वा
दिवानिशं १ आलोचयंतीस्वानंदमग्नातिष्ठतिसांप्रतं प्रचरिष्यतितल्लोकेमारणेष्ट
भुवशाद्यदा ११॥

तच्चेतिभावः अध्यात्मरामा यणमितिसर्वग्रंथनामअत्मनेतिध्या।
त्मआत्मनिचिंते तयामितयावर्तमानोयोरामोरमंतेयोगिनोत्रेतिव्युत्पत्यातयोमीतस्याय
नंचित्तशुद्धिद्वाराप्रापकं तत्प्रतिपादकत्वादिति तच्चअध्यात्मरामायणं उत्तरश्लोकस्यआलो
चनेदमेवकर्म १ स्वानंदमग्ना स्वस्वरूपानंदमग्ना तिष्ठतियततःसांप्रतंयुक्तं एतदालो
चनेनस्वस्वरूपानंदस्यजगादंतयोग्नि तत्पदस्यसमर्थमानादितिभावः ११ ॥ ॥ ॥

श्री
अ रा॰
बा टी॰
४

२२ संप्रवर्त्तते जनेष्विति शेषः २३ सर्वेषां पापग्रस्तत्वात्कलाविति भावः शास्त्राणि न्यायादीनि
विवदंते विवादं कुर्वते आत्मविषये इत्यर्थः कर्ता भोक्ता तानाश्रय आत्मा परस्परं भिन्न इति
काणादगौतमाः स्वषोडशपादियदार्थ्यानां परस्य रमात्मनि भेदत्वानात्म क्लिरित्यादि च तानस्वरू
पाश्चानेके जीवास्तेषां प्रकृत्यादिभ्यो भेदत्वानात्मोन्नदृति सांख्यादयः एक एव चेतनोऽपाधिभे।

तस्याध्ययनमात्रेण जना यास्यंति सद्गतिं तावद्विजृंभते पापं ब्रह्महत्यापुरःसरं २२
यावज्जगति नाध्यात्मरामायणमुदेष्यति तावत्कलिर्महोत्साही निःशंकं संप्रवर्त्तते २३
यावज्जगति नाध्यात्मरामायणमुदेष्यति तावद्यमभटाः शूरास्संचरिष्यंति निर्भयाः
तावत्सर्वाणि शास्त्राणि विवदंते परस्परं यावज्जगति नाध्यात्मरामायणमुदेष्यति २५
तावत्स्वरूपं रामस्य दुर्बोधं महतामपि यावज्जगति नाध्यात्मरामायणमुदेष्यति २६

दात्नानात्वं प्रामस्त्वमस्यादिवाक्यजन्यश्रवणमनननिदिध्यासनैर्ब्रह्मैवाहमिति तानाड्युपाधि
विलयस्वस्वरूपेणावस्थानमेव मोक्ष इत्यौपनिषदाः सिद्धांत अध्यात्मरामायणोदये स्फुटो
भविष्यतीति ततश्चाश्रवासनाजन्यो वादो लयमेष्यतीति भावः २५ रामस्य स्वरूपं सच्चि
दानंदाद्वयब्रह्मस्वरूपं महतामपि शास्त्रज्ञानानामपि दुर्बोधं भवतीति शेषः २६ ॥ ॥ ४

२७ २८ अध्यात्मरामायणातः सार्वविभक्तिकः पञ्चम्यंतात्तसि २९ जीवन्मुक्त इति तल्लक्षणं च दुःखे
ष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते इत्यादिना गीतायामु-
क्तं वासिष्ठेऽपि निर्दिष्टो ज्ञानवस्थांते यो भाव उपजायते तं भावं भावयन् रामजीवन्मुक्तः सदा

अध्यात्मरामायणसंकीर्तनश्रवणादिजं फलं वक्तुं न शक्नोमि कात्स्न्येन मुनिस-
त्तम २७ तथापि तस्य माहात्म्यं वक्ष्ये किंचित्तवानघ शृणु चित्तं समाधाय शिवेनोक्तं
पुरा मम २८ अध्यात्मरामायणतः श्लोकं श्लोकार्द्धमेव वा यः पठेद्भक्तिसंयुक्तः स पापा-
न्मुच्यते क्षणात् २९ यस्तु प्रत्यहमध्यात्मरामायणमनन्यधीः यथाशक्ति वदेद्भक्त्या
स जीवन्मुक्त उच्यते ३० यो भक्त्यार्चयतेऽध्यात्मरामायणमतंद्रितः दिने दिनेऽश्वमेधस्य
फलं तस्य भवेन्मुने ३१ यदृच्छयापि योऽध्यात्मरामायणमनादरात् अन्यतः शृणुया-
न्मर्त्यः सोऽपि मुच्येत पातकात् ३२ नमस्करोति योऽध्यात्मरामायणमहूरतः सर्वदेवार्च-
नफलं संप्राप्नोति न संशयः ३३ लिखित्वा पुस्तकेऽध्यात्मरामायणमुपोषितः यो दद्या-
द्रामभक्तेभ्यस्तस्य पुण्यफलं शृणु ३४ अधीतेषु च वेदेषु शास्त्रेषु व्याकृतेषु च यत्फ-
लं तु लभेल्लोके तत्फलं तस्य संभवेत् ३५ एकादशीदिनेऽध्यात्मरामायणमुपोषितः ३

भवेति ३१ ३२ अनादरात् यदृच्छयापि तत्पुराणश्रवणविभुक्तनियमेनेत्यर्थः ३२ ३३
३४ अधीतेष्विति सांगवेदाध्ययने शास्त्रार्थाध्ययने च यत्पुण्यं लभेत तत्फलं तस्याध्यात्मरामा-
यणपुस्तकदातुः संभवेदित्यर्थः ३५ ॥

श्री॰ अ रा॰ टी॰ ५

३४ ३७ ज्ञानवितः कृतज्ञानावाणः ३८ आत्मतत्त्वं धनं प्रतिप्रियं विविक्तस्यार्थः सर्वतोभद्रे जले
स्थितमित्यर्थः पुष्करे सर्वतोभद्रमिति तत्पर्यायेणाभिधानात् ३९ आत्मतत्त्वेभ्य इति अनेन
देशद्रव्यवक्तृकालसंप्रधानविशेषाणां पुण्यातिशयजनकत्वं सूचितं ४० गायते इति पाठे त

योरामभक्तः सततं व्याकरोति नरोत्तमः तस्य पुण्यफलं वक्ष्ये शृणु वैष्णवसत्तम ३६
मन्वन्तरं तु गायत्री पुरश्चर्याफलं भवेत् उपवासव्रतं कृत्वा श्रीरामनवमीदिने ३७
रात्रौ जागरितो ध्यात्मरामायणमनन्यधीः यः पठेच्छृणुयाद्वापि तस्य पुण्यं वदाम्यहं ३८
कुरुक्षेत्रादिनिखिलपुण्यतीर्थेष्वनेकशः आत्मतुल्यं धनं सूर्यग्रहणे सर्वतोभवे ३९
विप्रेभ्यो ह्यात्मतुल्येभ्यो दत्त्वा यत्फलमश्नुते तत्फलं संभवेत्सत्यं सत्यं न संशयः ४०
यो गायते मुदाध्यात्मरामायणमहर्निशं आज्ञास्तस्य प्रतीक्षन्ते देवा इन्द्रपुरोगमाः ४१
पठन्नन्वहमध्यात्मरामायणमनुव्रतः यद्यत्करोति तत्कर्म ततः कोटिगुणं भवेत् ४२
तत्र श्रीरामहृदयं यः पठेत्सुसमाहितः स ब्रह्मघ्नोऽपि पूतात्मा त्रिभिरेव दिनैर्भवेत् ४३
श्रीरामहृदयं यस्तु हनूमत्प्रतिमान्तिके त्रिः पठेत्प्रत्यहं मौनी स सर्वेप्सितभाग्भवेत् ४४

हर्षः यो गायति मुदेति पाठे तु युक्तमेव ४१ अनुव्रतः तत्परः ततः स्वभाक्रियमाणकर्मणः
४२ तत्राध्यात्मरामायणमध्ये सुसमाहितः स्थिरचित्तः ४३ प्रतिमान्तिके प्रतिमासमीपे ४४

यत्कुलस्यादिसंनिधौ रामहृदहृदयं पठन् प्रकुर्वीत प्रदक्षिणादीनि शेषः सप्रत्यवतं प्र
त्यवतो वा व्रणां ब्रह्महत्यां तज्जन्यपापं निवर्तयेत् आत्मनः श्रोतव्येति शेषः ४५ अहं ब्रह्मा ४६
यत्रामगीतामाहात्म्यं ४७ रामगीतापठमानेनेति शेषः कदाचन रविग्रहादिकालेपि

पठन् श्रीरामहृदयं तत्र लसच्छत्ययोर्यदि मत्यत्ततं प्रकुर्वीत ब्रह्महत्यां निवर्तयेत्
४५ श्रीरामगीतामाहात्म्यं कृत्स्नं जानाति शंकरः तदर्द्धं गिरिजा वेत्ति तदर्द्धं वेद्म्यहं म
ने ४६ तन्ते किंचित्प्रवक्ष्यामि कृत्स्नं वक्तुं न शक्यते यज्ज्ञात्वा तत्क्षणाल्लोकश्चित्तशुद्धि
मवाप्नुयात् ४७ श्रीरामगीता यत्पापं न नाशयति नारद तन्न नश्यति तीर्थादौ लोके
क्वापि कदाचन ४८ तन्त्रं गुणाम्यहं लोके मार्गं मार्गणापि सर्वदा ४८ रामेणापि तिषु
त्रिंशु मन्त्र्योत्यादितो सदा लक्ष्मणायापितो गीता सर्वापीता मयो भवेत् ४९
जमदग्निसुतः पूर्वं कार्तवीर्यवधेच्छया धनुर्विद्यामभ्यसितं महेशस्यान्तिके वा
सन् ५० अधीयमानां पार्वत्या रामगीतां प्रयत्नतः श्रुत्वा हृष्टहृदाश्रुपठनेनाराय
णकलामगात् ५१ ब्रह्महत्यादिपापानां निष्कृतिं यदि वाञ्छति रामगीतामास
मात्रं पठितो मुच्यते नरः ५२ ॥ मार्गं मार्गणाः ग्रन्थषट्त्रुपितत्

स्नानादिनेति शेषः ४८
रामगीतातुल्यतया पापनाशकं वस्तु रामगीतातिरिक्तं न पश्यामीत्यर्थः ४९ गीतास्सर्था
मिति रूपकं अमृतरूपां गीतामित्यर्थः अभवत्ततुल्यः कार्तवीर्यः सहस्रबाहुरर्जु
नः ५० श्रवणोत्तरं ग्रहणानारायणकलांनारायणांशरूपत्वं ५१ ५२ ॥

श्री॰ अ॰ रा॰ वा॰ टी॰ ६

दुःप्रतिग्रहइति दुःप्रतिग्रहस्तिलधेनुर्गजोवाजीक्षेत्राद्युत्तिनंमणिः मणिःशालग्रामस्तद्वा
भिःहूयमानाचयोवाः सम्प्रतिग्रहादित्यादिरूपस्तत्कृतं दुर्भोजनंनिषिद्धभक्षणंदुरालापोन्तभाष
णादि ५३ ५४ ५५ ५६ तत्तद्दानादिजनंतत्फलंलभेत् अनंततत्फलदानादिफलभोगेतदध्यय

दुःप्रतिग्रहदुर्भोजनदुरालापादिसंभवं पापंयत्तत्कीर्तनेनरामगीताविनाशयेत्
शालग्रामशिलाग्रेवतुलस्याश्वत्थसंनिधौ यतीनांपुरतस्तद्वद्रामगीतांपठेत्तुयः ५४
सतत्फलमवाप्नोतियद्वाचोमनसोःपरं रामगीतांपठेन्नभक्त्यायः श्राद्धेभोजयेद्द्विजा
न् तस्यतेपितरः सर्वेयांतिविष्णोःपरंपदं ५५ एकादश्यांनिराहारोनियतोद्वाद
शीदिने स्थित्वागस्त्यतरोर्मूलेरामगीतांपठेत्तुयः सएवराघवः साक्षात्सर्वदेवै
श्चपूज्यते ५६ विनादानंविनाध्यानंविनातीर्थावगाहनं रामगीतांनरोधीत्यत
दनंतफलंलभेत् ५७ बहुनाकिमिहोक्तेनशृणुनारदतत्त्वतः श्रुतिस्मृतिपुरा
णेतिहासागमशतानिच अर्हंतिनाल्पामध्यात्मरामायणकलामपि ५८ ॥

तन्मात्रेणप्रभवोदित्यर्थः ५७ श्रुतिर्वेदः स्मृतिर्मन्वादिप्रणीता पुराणानिब्राह्मादीन्यष्टाद
शेतिहासोभारतादिः आगमाःपंचरात्रादयः अध्यात्मरामायणस्यैतदध्ययनस्यक
लांषोडशांशमपिनार्हंतितदध्ययनानीत्यर्थः सर्वाध्ययनफलदत्वादेतस्येतिभावः ५८ ६

पठतीत्यत्र उक्तमाहात्म्याध्यायकर्म ५९ इति श्रीमन्नकलराजविपक्षर्दुवणसम
र्थेत्यादिविरुदावलीराजमानस्य हिम्मतिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतौ अ

अध्यात्मरामचरितस्य कृतीश्वराय
महात्म्यमेतदुदितं कमलासनेन ।
यः श्रद्धया पठति शृणोति यात्र मर्त्यः
स प्राप्नोति विष्णुपदवीं सुरदुर्लभां
नः ५९ ॥ इति श्रीब्रह्माण्डपुराणे
उत्तरखण्डे एकषष्टितमोऽध्यायः १

ध्यात्मरामायणसेतौ बालकाण्डे तन्माहात्म्याध्यायः ॥१ ॥

रामायनमः ॥

श्री॰
अ॰ रा॰
बा॰ टी॰
७

शिवपार्वतीसंवादरूपमध्यात्मरामायणं वक्तुं भगवान् व्यासो निर्विघ्नार्थं भगवत्स्मरणरूपं
मंगलमाचरति यदिति पृथ्व्यादिदुष्टानां तस्मादिति तिलोभरो भारवत्तस्यावारणायेत्यर्थः परित्राणा
य साधूनां विनाशाय च दुष्कृतां धर्मसंस्थापनार्थाय संभवामि युगे युगे इति भगवदुक्तेः त्रिवि
बुधैर्देवैः रावणपीडितैः संप्रार्थितः सन् चिन्मयोपि विद्रूपोपि अव्ययोपि पृथ्वीतले रविकुले मा
यामनुष्यः संजातः तत्र देवप्रार्थनया यमवतार इत्यर्थः वाल्मीकेये बालकांडे पंचदशषोड
शर्गः स्पष्टमव्ययत्वमन्यभावस्य नाशाविर्भावाभावादत्र उक्तं मायेति मायान्नामसर्वास॰

यः पृथ्वीभरवारणाय दिविजैः संप्रार्थितश्चिन्मयः संजातः पृथ्वीतले रविकुले माया
मनुष्योऽव्ययः निश्चक्रं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां कीर्तिं पापहरां विधाय जग
तं जानकीशं भजे ॥१॥

त्याभ्यामनिर्वाच्यस्वरूपस्तमोगुणः चटितचेतनासामर्थ्यवती काचिदीश्वरशक्तिः देवा
त्मशक्तिं स्वगुणैर्निगूढामिति श्रुतेः दैवी ह्येषा गुणमयी मम माया दुरत्ययेति गीतोक्तेश्च एवं चा॰
चिन्मयस्याघटितोपि मनुष्याभावो नित्यत्वव्यवहारश्च मायाकृत इत्यभिभावः तदुक्तं रामपूर्वतापनीयो
पनिषदि चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः उपासकानां कार्यार्थं ब्रह्मणो रूप
कल्पनेति निश्चक्रं निर्विशेषं यथा तथा हतराक्षसः जगतां पापहरां स्थिरां कीर्तिं विधाय लो
के स्थापयित्वा पुनराद्यं ब्रह्मत्वं निरुपाधिब्रह्मरूपमगात् ॥१॥

७

तमस्योक्तं ब्रह्मसत्वं लक्षणौद्दिश्यति विशदयते विश्वस्य संसारस्योत्पत्तिलयादिषु एकं हेतुं यतो वा इमा
नि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति श्रुतेः प्रयंतीति यत्र लीनानि भवंतीत्य
र्थः अनेन निमित्तकारणत्वसमानाधिकरण्येनोपादानकारणत्वं ब्रह्मलक्षणं सूचितं एकमि
त्यनेन सहायार्थकं तेन निमित्तकारणाभेदः सूचितः ननु मिथ्याभूतकार्यनिरूपितकारणत्वस्या।
पि मिथ्यात्वाद्ब्रह्मणः संबंधाभावात्कथमस्य लक्षणत्वमत आह मायाश्रयमिति मायाश्रयत्वा
त्तत्कृतमिदमस्य कारणत्वमित्यर्थः मायिकेन कारणत्वेन मायिक एव ब्रह्मणः संबंध इति भावः
तदुक्तं स्मृतौ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति ननु मायाश्रयत्वे जीवं प्रति स्वस्व

विश्वोद्भवस्थितिलयादिषु हेतुमेकं मायाश्रयं विगतमायमचिंत्यमूर्तिं आनंदसां
द्रममलं निजबोधरूपं सीतापतिं विदितत्त्वमहं नमामि २॥

रूपमिव स्वं प्रत्यपिधानं
मायया आवरणं स्यात्तत्राह विगतमायमिति विगता माया आवरणशक्तिरूपा यस्मात्तेन प्रति।
स्वस्वरूपावरणशक्तिरहितता सत्यर्थः अचिंत्यमूर्तिं यतो वाचो निवर्तंते अप्राप्य मनसा सहेति श्रुतेः
एवं जगदुत्पत्त्यादिकारणत्वरूपं तटस्थलक्षणमुक्तं तेन रूपेणाज्ञेयत्वात् अथ स्वरूपलक्षण
माह आनंदसांद्रममलं निजबोधरूपमिति सत्यं ज्ञानमानंदं ब्रह्मेति श्रुतेः इदमेव तत्त्वं अ।
मलं उपाधिकृतदोषरहितं जीवस्तूपाधिकृतकर्तृत्वाद्यभिमानवान् तथा नेश्वर इति भावः।
निजं स्वाभाविकं बोधरूपमेव यस्य तं अनेन रूपांतरं सर्वं मायिकमिति सूचितं विदितत्त्वं वित्ता।
तत्त्वस्य बोधः स्वरूपत्वं येन तं तेन नानावतारे शोककामादिनटनमात्रमिति सूचितं २॥

श्रीं अ० रा० टीं ८

हरिमेव हरिसायुज्यमेव ३ यः शृणुयात्सहस्रशोऽभिमाषुनतज्ज्ञाणितकदिसंख्यगोदानादधिकं फ
लंलभेदित्यन्वयः ४ पुरारिगिरिसंभवाश्रीनिमाणावृत्तिवरूपके अध्यात्मरामसंगवोति अध्यात्मरामशाहेज्ञा
त्मरामायणापरस्तुद्देवगंवोति अनेनतद्रूपकेणासर्वमहापातकादीनामपिनाशइतिसूचितं गंगायां
लसावाकतवस्यसर्वकृतिस्मृतिसिद्धित्वात् ५ सकलमलहरवस्तुविषयमाहाकस्यसकलमलहरवं
आनंदकंदमितीवृषणां एतस्यैवानंदस्यमात्रामुपजीवंतीतिश्रुतेस्यसर्वानंदमूलत्वेनानंदकंदत्व

पठंतियेनित्यमनन्यचेतसः शृण्वंतिचाध्यात्मिसंतिसुतं रामायणांसर्वपुराणसम्मतं
निर्धूतपापाहरिमेवयांतिते ३ अध्यात्मरामायणमेवनित्यंपठेद्यदीच्छेद्भवबंधमुक्तिः गवांस
हस्रायुतकोटिदानात्फलंलभेद्यः शृणुयात्सनित्यं ४ पुरारिगिरिसंभवाश्रीरामार्णवसंगता
अध्यात्मगंगेयंपुनातिभुवनत्रयं ५ कैलासाग्रेकदाचिद्रविशतविमलेमंदिरेरत्नपी
ठेसंविष्टंध्याननिष्ठंत्रिनयनमभयंसेवितंसिद्धसंघैः देवीवामांकसंस्थागिरिवरतनया
पार्वतीभक्तिनम्राप्राहेदंदेवमीशंसकलहरंवाक्यमानंदकंदं ६ नमोस्तुतेदेवजगन्नि
वाससर्वात्मदृक्त्वंपरमेश्वरोसि पृच्छामितत्त्वंपुरुषोत्तमस्यसनातनत्वंचसनातनोसि ७

देवोद्योतनात् जगन्निवसत्यस्मिन्जगतितिनिवसतीतिवाजगन्निवासस्तत्संबुद्धिः तेतुभ्यंनमः अत्र
यतस्त्वंसर्वात्मदृक् सर्वस्यरूपमात्मासर्वात्मा ब्रह्मसर्वंखल्विदंब्रह्मेतिश्रुतेः तमनिशंमात्मस्व
रूपतयापश्यतीतिसर्वात्मदृक् अतएवपरमेश्वरोसिअतः पुरुषोत्तमस्यसर्वेभ्यः पुरुषेभ्यउत्तमा
मस्यतस्यैवब्रह्मणः सनातनेउपाधिरहितंसोपाधिरूपस्त्वंजानातितेनापाचेसनातनत्वंतत्त्वमिच्छा

यश्रीशितिवदनानंगांकिंचिदितिमायः ॥७॥

सितत्वसनातनेनेत्यन्वयः कथंतद्वींसमसमसमनकोनिसमसीस ८

अत्यंतंगोप्यं इदंतत्तेगुह्यतममितिगीतोक्तेः अनन्यवाच्यंभक्त्यानेष्ववक्तुंमयोग्यं अहोतदपिभ
क्तेषुवदंतिअतोमेपृष्टंयत्तत्वनिश्चयेवद हेदेवयतोहंतवभक्त्या. ननुमद्भक्त्यामितःतत्राह
यतस्त्वंमेप्रियोसि ८ ज्ञानमिति येनज्ञानेनजनास्तरंतिभवजन्मादिसंसारेनपातंभवंतितत्
सविज्ञानंज्ञानंतद्ब्रूहि विज्ञानंनिदिध्यासनपरिपाकजन्यपरोक्षज्ञानेनसहितंतत्फलकमि
तियावत्ज्ञानंश्रवणमननजन्यपरोक्षंब्रह्मैवसत्वंब्रह्मैवाहमितिच तरतिशोकमात्मविदिति
श्रुतेः तद्बोधितजनकवाक्यंब्रूहीत्यर्थः ततज्ज्ञानंचनवैराग्यंविनावैराग्यंचनभक्तिंविनेत्यतआ

गोप्यंयदत्यंतमनन्यवाच्यंवदंतिभक्तेषुमहानुभावाः तदप्यहोहंतवदेवभक्त्यामितो
सिमेत्वंवदयत्तुपृष्टं ८ ज्ञानंसविज्ञानमथानुभक्तिंवैराग्ययुक्तंचमितंविभाव्यत ज्ञा
नाम्यहंयोषिदपित्वदुक्तंयथातथाब्रूहितरंतियेन ९ पृच्छामिचान्यच्चयदत्ररहस्यंतेदे
वचाम्यवदवाविजात श्रीरामचंद्रोविललासकालेसारेभक्तिर्हृदयस्यनोभवतिप्रसिद्धा ९

८ अनुभक्तिवैराग्ययुक्तंचेतिभक्तेः पश्चादनुभक्तिजायमानंयद्वैराग्यं तद्युक्तं तदुपाय
बोधकवाक्ययुक्तंचेत्यर्थः तथाचप्राक्तंजलेसूत्रेदृष्टानुश्रविकविषयवितृष्णस्यवशीकारसं
ज्ञावैराग्यमिति अनुश्रवोवेदस्तद्बोधितःस्वर्गादिरानुश्रविकः भक्तिरीश्वरानुरागः तथा
मितंमितत्वाह्रवत् विभाव्यत्विशेषेणभाव्यत् श्रुतिमात्रेणाह्यदितीत्यर्थः प्रत्यायकशब्द
युतबोधजनकवाक्य यत्तत्सूक्ष्मयथायोषिदप्यहंत्वदुक्तंजानामि ९ अग्रेप्रथमतः हृ
द्भक्तः प्रसिद्धानोभवतिभवसागरोत्तारणायेतिशेषः ९ ॥ ॥ ॥ ॥ ॥

श्री. प्र. पं. वा. टी. ८

तदेवाहमस्मि किंचिति ततोन्यत्तत्साधनं नास्ति अन्यद्दर्शितसाधनं मोक्षजनकतत्त्वज्ञानयत्नेनाली
त्यर्थः तावत्त्वोतपेक्षितत्वात् भक्तिः परानुरक्तिरीश्वरेति भक्तिमीमांसाकर्त्तृच्छाण्डिल्यसूत्राभ्यां अ
वेणात्तु तेन स्वसाधनतया पेक्षितत्वात्मा भक्तिर्मुक्तिरित्यायुक्तार्थः भक्तिलक्षणाय सेव द्वितीयसूत्रे इ
त्साधवृषतेन ह्यकृतसंशयविषयं रामस्थानीश्वरत्वं ४ निरस्तसमस्तमायागुणांसंवादि इतोवावा
ह्वेषादिसंबाधायेन तं अप्रमत्तोप्रमादोऽज्ञानं तदूहिताः प्रमादं वैमृत्युमहं ब्रवीमीति सनत्सुजा

भक्तिः प्रसिद्धा भवमोक्षणाय नान्यत्ततः साधनमस्ति किंचित् तथापि हृत्संशयबंधनं मे
विभेत्तुमर्हस्यमलोक्तिभिस्त्वं ११ वदंति रामं परमेकमाद्यं निरस्तमायागुणसंप्रवाहं भज
ति चाहर्निशमप्रमत्ताः परं पदं यांति तथैव सिद्धाः १२ वदंति केचित्परमोपि रामः स्वावि
द्ययासंवृतमात्मसंज्ञं जानाति नात्मानमतः परेण संबोधितो वेद परात्मतत्त्वं १३ ॥

तीयोक्तः तत्र हि मृत्युर्वैतमः इति श्रुतेर्मृत्युपदेनाज्ञानमिति बोध्यं तथैव तेन प्रकारेण भजनेनैव
सिद्धा लब्धसत्ताः संतः परं पदं मोक्षं यांति १३ परमोपि रामः स्वाविद्ययामायया वेद जानाति केचि
द्वदंति तथा च वाल्मीकीये रावणवधानंतरं ब्रह्मवाक्यं तत्र वाच ततो देवः स्वयंभूरमितद्यु
तिः पञ्चदशमित्विस्वांकुस्मारयन्सर्वदेहिके भवान्नारायणः साक्षाद्देवश्चक्रायुधप्रभुरित्यादि उ
पदेशात् हन्याभगवद्दत्ते ब्रह्मदाशरथेर्यद्यहं त्वं नैव आत्मानं मन्ये तस्य विस्मृतस्य संबोधनयत्नात्

सीतातिमितोविलापस्तत्वारण्यककांडकिष्कंधादौवाल्मीकीयस्पष्टएव केनमेव्यः अतस्मा
जीववत्तेव्यत्वाभावइत्यर्थः ॥ ५ ॥ यतात्मनोब्रह्मणः ॥ ६ ॥ एवंपार्वत्यापृष्टःशिवोरामस्वरूपमा
हरामइतिरामःपरमात्माब्रह्मैवेत्यर्थः प्रकृतेरित्यस्यान्यइति अंसंसर्गीतिचयोषः प्रकृतिनिरूक
र्येभान्यत्वातेरसंसर्गाच्चरामः परमेश्वरएवेत्यर्थः जीवस्तुतैषाधिक्षिःसंसृष्टस्तद्धर्मकर्त्त्वाध
भिमानवानितिभावः अतएवानादिवेकअत्रानेदाकार्यानंदव्याहृतयेऽनादिरिति एवंचानंदस्वल
यदिसजानातिकुतोविलापः सीताहृतेतेनकृतःपरेणा जानातिनैवंयदिकेनसेव्यः
समोहिसर्वैरपिजीवजातैः ॥ ५ ॥ अत्रोतवंकिंविदितंभवद्भिस्तद्ब्रूतमेसंशयभेदिवा
क्यं ॥ ९ ॥ श्रीमहादेवउवाच धन्यासिभक्तासिपरात्मनस्त्वंयज्ज्ञातुमिच्छातववामततत्व
पुरातनेनाप्यभिवोदितोहंवक्ष्येरहस्यंपरमंनिगूढं ॥ ६ ॥ त्वयाद्यभक्त्यापरिनोदितोस्मि
हंवक्ष्येनमस्कृत्यरघूत्तमंते रामःपरात्माप्रकृतेरनादिरानंदएकःपुरुषोत्तमोहि
॥ २ ॥ स्वमाययाकृत्स्नमिदंहिसृष्ट्वानभोवदंतर्बहिरास्थितोयः एकमेवाद्वितीयंब्रह्मेति
श्रुतिसिद्धब्रह्मेत्य अतएवपुरुषोत्तमःपुरुषेभ्योजीवेभ्यउत्तमःहिप्रसिद्धमेतदित्यर्थः ॥ २ ॥
नन्वीदृशस्यसमनुष्यादिदेहधारणंकथमतआह स्वमाययेति अघटितघटनापाटीयसीमाया
मायांतप्रकृतिंविद्यान्मायिनंतुमहेश्वरमितिश्रुतिसिद्धानयाइदंकृत्स्नंदृश्यंसृष्ट्वातबहिरास्थितो
यः तत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः तादृशस्यमनुष्यादीवपरिग्रहोनाश्चर्यायतउक्तंगीता
भाष्येभूतानामीश्वरोनित्यशुद्धबुद्धमुक्तस्वभावोपिस्वमाययादेहवानिवजातइवचलोकानुग्रहंकु

न त्वेवं सर्वगतत्वे सर्वज्ञत्वे यः किं नेत्यत आह सर्वान्तरस्यापि निगूढ आत्मेति यः पृथिव्यां तिष्ठन् पृथि-
व्या अन्तर इत्यादिश्रुत्या सर्वान्तरस्य त्वेनोक्तोपि निगूढः एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते दृश्य-
ते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति श्रुतेः तादृशस्य सर्वव्यवहारकालिकमपि मान्यता
ह स्वमाययेति स्वाज्ञानकल्पितया माययेत्यर्थः अयं भावः नित्यशुद्धादिरूपे स्वस्वरूपाज्ञाने
न तस्यावृतिरेतेन चाटनासामर्थ्यापरपर्याया माया व्याविशरणशक्तिरूपाधिकल्पितावच्छेदे
ल्लक्षणरूपैर्जीवैः कल्पिता स्वाचस्वजातीयमेव संसारमखिलं च प्रसूते अतएव तत्स्वरूपज्ञाने
सकार्याया अस्या नाशः रज्जुज्ञानेनैव रज्जुकल्पितभुजगस्य भयकंपादिकार्यसहितस्य नच

सर्वान्तरस्यापि निगूढ आत्मा स्वमायया सृष्टमिदं विचष्टे ८ ॥

जीवैस्तत्कल्पनात् तत्स्वरूपोपाधिभिश्च जीवत्वे त्वन्योन्याश्रयः अनादित्वेन परिहारात् नत्वेकस्य
तत्त्वज्ञानेन तन्नाशे संसारोच्छेदापत्तिः एकस्य जीवस्य युगपत् दशानां सर्पभ्रमे एकस्य रज्जुज्ञानेनैतस्य
सर्पभ्रमेतत्कार्यभयकंपादेर्निवृत्तावपि अन्येषां तद्दर्शनेन तदनिवृत्तिवदुपपत्तेरिति तथा सृष्ट-
मिदं विचष्टे पश्यतीत्येवं च द्रष्टृत्वेन तत्सिद्धिः नान्योतोस्ति द्रष्टेति श्रुतेः एकेनैवाकाशेनोपाधि-
भेदात् घटाकाशादिव्यवहारवत् एकेनैव चैतन्येनोपाधिभेदादनेकजीवव्यवहारोपपत्तौ चे।
तनानेकत्वमानाभावात् द्रष्टृत्वेन तत्सिद्धिरिति भावः न च तत्तदज्ञानरूपोपाधिविशिष्टस्यैव
जीवत्वे जीवस्याज्ञानमिति व्यवहारानापत्तिः मायाविशिष्टस्येवरूपस्यापि रहस्यसंभावैति व

[illegible]

चेतनस्वीकारेमांतरमाह जगंतीजगदंतुः करणानियत्नंनिधौनित्यंपरितोभ्रमंतिस्वयंवे
ष्टंजडंतिः अन्यथासर्वस्यजडत्वाच्चेतनाभावजगदाद्यप्रसंगादितिभावः ननुनिष्कलोनिष्क्रि
यश्चात्मेतिनिष्कलस्तस्यनिष्क्रियत्वयाकथंतेनान्येषांव्यापारसंपादनमतआह द्रुवकलोह
वद्धीति यथानिष्क्रियोपिद्रुवकमणिर्लोहशलाकाविशेषान्संनिधिमात्रेणचालयतितथायं-
तेनापिनिष्क्रियोपिस्वमायावैचित्र्यादेवतान्संनिधिमात्राद्व्यापारयतीत्यर्थः तदुक्तंमावाच्ये
रत्नायत्रविकारः सत्वपक्षांतवदेवयद्वध्यादीश्चालयेत्सत्यकसोहमित्यवधारयेति एतन्न

जगंतिनित्यंपरितोभ्रमंतियत्संनिधौद्रुवकलोहवद्धि एतन्नजानंतिविमूढ
चित्ताः स्वाविद्ययासंवृतमानसाये ४९ स्वात्मानमप्यात्मनिशुद्धबुद्धे स्वा-
रोपयंतीहनिरस्तमाये संसारमेवानुसरंतितेवैपुत्रादिसक्ताःपुरुकर्मयुक्ताः ५०

मायागुणाःस्पष्टत्वादिरूपंतामसरूपमेजीवान्नजानंतिअत्रानेहनविमूढचेतसः
विमूढचेतसत्वेहेतुः स्वाविद्ययासंवृतमानसाइतिस्वोपाधिभूतयाअविद्ययाविद्यावि
रोधिभावदार्ढ्यरूपयासंवृतांतःकरणाः ४९ अतस्तेजीवाःशुद्धबुद्धेशुद्धत्वेमायादोषा
संस्पृष्टेतेनबुद्धत्वानस्वरूपे निरस्तमायेस्वज्ञानवतानिरस्तामायायेनतादृशेमामेवये
प्रपद्यंतेमायामेतांतरंतितेइतिगीतोक्तेः ईदृशेपरमेस्वात्मानंसततमारोपयंतिस्वयम
नन्यामात्मममनमितिजानंतीत्यर्थः तेषांउक्तंफलमाह संसारमितितेपुत्रादिसक्ताः
पुरुकर्मयुक्ताः भूरियत्नादिकर्मयुक्ताः संसारमेवानुसरंति ५० ॥

श्री॰
अ टी॰
बो टी॰
११ को

गतस्तेयथाऽज्ञाः कंठगतं चामीकरं स्वर्णालंकारं यथा न जानंति एवं हृदये स्थितं रामं ते जानंति
अतः स्वसाक्षेवाजानंतीत्यर्थः किंच रामस्याऽज्ञानासंभव इति दृष्टांतेनाह यथेति अप्रका
शात्मे यथा रवौ ज्योतिः स्वरूपेण विद्यते तथा विशुद्धविज्ञानेन निर्विशेषापरोक्षज्ञानेना
न्येनेति विद्वेपरतः परात्मनि उत्कृष्टेऽप्यमुष्टे रामे अविद्या कथं स्यात् नादृष्टोवस्त्वन्यविद्या न
वस्यादिति भावः तदुक्तमाचार्यैः अप्रकाशाय यथादित्ये नास्ति ज्योतिः स्वभावतः नित्यबो
धस्वरूपत्वान्नाज्ञानं तद्वदात्मनीति २१ नन्वज्ञानेन रामस्य न व्यवहरति जन इत्युक्तमतं

ज्ञानं त्विवं हृदयस्थितं वै चामीकरं कंठगतं यथाज्ञाः यथाप्रकाशो न तु विद्य
ते रवौ ज्योतिः स्वभाव एव मे स्वरे तथा विशुद्धविज्ञानघने रघूत्तमे विद्या कथं स्यात्
परतः परात्मनि २१ यथाहि चाक्षाभ्रमता गृहादिकं विनष्टदृष्टेर्भ्रमतीव दृश्य
ते तथैव देहेंद्रियकर्तुरात्मनः कृतं परे अध्यस्य जनो विमुह्यति २२ ॥ ॥ ॥

गतं अन्यगतस्यान्यत्रारोपासंभवादित्याशंक्या सदृष्टांतं यथा मोहं जीव उपपादयति
यथाविनष्टदृष्टेर्दोषदुष्टदृष्टेः पुरुषस्य भ्रमता चाक्षा गृहादिकं भ्रमते वाऽस्येत्यर्थे भ्रमतीवेति दृश्य
ते एवं नष्टदृष्टिना पुरुषेणेति शेषः तथैव देहेंद्रियावच्छिन्नस्य कर्तुरात्मनोऽन्तःकरणस्या
हंकारात्मस्य कृतं परे सर्वधर्मालिप्ते तदवच्छिन्ने चैतन्ये अध्यस्य जनो जीवो मुह्यति अहंका
र्तेति सो प्राप्नोति एवं वयस्यादिगतभ्रमणं गृहादावारोपः यथा चान्तःकरणधर्मस्य क
र्तृत्वादेरात्मन्यारोपस्तथा स्वाज्ञानस्य रामे अध्यारोप इत्याशयः २२ ॥ ॥ ११

भगवति रामे स्वतोऽज्ञानमसंभवतीति पुनरपि दार्ष्टान्तयोक्तमुक्तौ वाह नाहइति सूर्यं प्रति रात्रि
दिवसविभागाभावे हेतुः प्रकाशरूपाव्यभिचारतः क्वचित्क्वापीत्यर्थः ज्ञानमज्ञानमयोर्भगवत्यनवस्थितौ हेतुः शुद्धचिद्घनत्वे २२ उपसंहरति तस्मादिति परानंदमये सर्वभूतेषु नन्दानंदमार्गे
याऽऽपजीवनात् विज्ञानरूपे निर्विकल्पज्ञानरूपे तमोऽज्ञानरूपं तमोऽसंवेद्ये हेतुद्वयमज्ञानसा
क्षित्वं मायाधिष्ठानरूपं मायाश्रयत्वं च कीदृक्तमः मोहकारणं तमोऽज्ञानं योयन्मायाधिष्ठानः
सत्तद्विषयाज्ञानहीनइति लोके दर्शनादिति भावः नन्वेवमपि ब्रह्मादयः कथं मोहं प्राप्ता

नाहो न रात्रिः सवितुर्यथा भवेत्प्रकाशरूपाव्यभिचारतः क्वचित् ज्ञानं तथाज्ञा
नमिदं द्वयं हरौ रामे कथं स्थास्यति शुद्धचिद्घने २२ तस्मात्परानंदमये रघूत्त
मे विज्ञानरूपे हि न विद्यते तमः अज्ञानसाक्षिण्यरविंदलोचने मायाश्रयत्वा
न्नहि मोहकारणं २३ अत्र ते कथयिष्यामि रहस्यमपि दुर्लभं सीतारामहनूम
त्संवादं मोक्षसाधनं २४ पुरा रामायणे रामो रावणं देवकंटकं हत्वा रणे रणश्लाघी स

न्दत्तमइत्यागुराचार्योक्तैः कारणाच्चितिविचेत् शृणु रावणवधार्थं मनुष्यवचनाटनाय भगव
ता स्वमाल्पद्वैतकृतस्य स्वमाहात्म्याच्छादनस्य तच्चतमः शोहेनोक्तरदोषात् उक्तं हि मत्स्यपुरा
णे एकैक संकल्पद्वैतकमभूद्यु नंदनस्य नारं विज्ञानमिति इति किंच न कालेमतत्र ब्रह्मोपदेश
मपलभ्यालीलितमात्रतच्चोत्ससर्ज समकृतेऽपि देवकार्ये इति भगवतेऽभुक्तं हीनं गीता रा ति
विशिष्यया चकारेति २४ महत्स्तत्वंपुत्रो हनूमान् २५ रामायणे रामायणप्रवर्तके

श्री
अ. रा.
बा. टी
१२

२७ परिवृतः सीतादिभिरिति शेषः २८ पुरतः स्थितमग्रे स्थितं अनेन गुरुरूपसदनं दर्शितं निरा
कांक्षं ज्ञानेन तद्धनादिनिरपेक्षं २९ तत्त्वमन्तस्वरूपतत्त्वं निष्कल्मषोऽयमित्यनेन ज्ञानाधिकारित्वं
सूचितं नौ आवयोः ३० रामस्य तत्त्वं अज्ञातनिश्चितं यथाभवति तथा प्राह लोकविमोहिनीत्यने
न बंधनकर्तृत्ववद्बंधविमोके सामर्थ्यमिति दर्शितं राजाज्ञया यावद्बद्धो हि तदाज्ञयैव मुच्यत इति
लोके प्रसिद्धं एवं च भगवतीकृपैव मुमुक्षोर्मोक्षकारणमिति दर्शितं ३१ जानकी प्राहेत्युक्तं त
दाह राममिति राम पदं ब्रह्मविद्धि रमंते योगिनोऽनंते नित्यानंदे चिदात्मनि इति निराम पदे
सीतया सह सुग्रीवलक्ष्मणाभ्यां समन्वितः अयोध्यायां यदा रामो हनुमत्प्रमुखैर्वृतः २७
अभिषिक्तः परिवृतो वसिष्ठाद्यैर्महात्मभिः सिंहासने समासीनः कोटिसूर्यसमप्रभः २८
दृष्ट्वा तदा हनूमंतं प्रांजलिं पुरतः स्थितं कृतकार्यं निराकांक्षं ज्ञानापेक्षं महामति २९
रामः सीतामुवाचेदं ब्रूहि तत्त्वं हनूमते निष्कल्मषोऽयं ज्ञानस्य पात्रं नौ नित्यभक्तिमान् ३०
तथेति जानकी प्राह तत्त्वं रामस्य निश्चितं हनूमते प्रपन्नाय सीता लोकविमोहिनी ३१
दं परं ब्रह्माभिधीयते इति तापनीये प्रथमे चोक्तेः सत्त्वबाधहीनं सत्यत्वं बाधराहित्यं जगदाधि
कसाहित्यात् बाधः किमात्मिको ब्रूहि न बमात्मिक इष्यते इत्युक्तेः चित् ज्ञानस्वरूपं आनंदं त द्रू
पं अद्वयं एकमेवाद्वितीयमिति श्रुतेः सर्वोपाधिविनिर्मुक्तं स्थूलसूक्ष्मसकलोपाधिरिति
मेत्तः विराड्हिरण्यगर्भस्वकारणात्मेत्युपाधयः ईशस्य यत्त्रिभिर्हीनं तत्त्वं तद्विदुरिति
वार्तिके किं च सर्वोपाधिभिर्यत्संविनिर्मुक्तं समस्पृष्टमित्यर्थः सत्तामात्रं वत्समात्रं सदिति व्यवहा

रामं विद्धि परं ब्रह्म सच्चिदानंदमद्वयं सर्वोपाधिविनिर्मुक्तं सत्तामात्रमगोचरं ३२

एतत्तत्त्वं राम विद्धि परं
ब्रह्म सच्चिदानंदमद्वयम्

रनियामकमित्यर्थः एतत्त्वं बंधादेव सर्वत्र सदि ३२॥

१२

निर्व्यवहार इति भावः अगोचरं मनोवचसोरविषयमित्यर्थः यतो वाचो निवर्तन्ते अप्राप्य म
नसा सहेति श्रुतेः ॥ आनंदं तत्त्वेन विपुलत्वमुपलक्ष्यते यो वै भूमा तत्सुखं नाल्पे सुख
मस्तीति श्रुतेः निर्मलं रजोहीनं शांतं प्रपंचोपशमत्वात् प्रपंचोपशमं शिवं शांतमिति श्रु
तेः निर्विकारं जायतेऽस्ति वर्धते विपरिणमते प्रक्षीयते नश्यतीति षड्भावविकारहीनं न जा
यते म्रियते वेति गीतोक्तेः अनेनापरिणामित्वं सूचितं निरंजनं अविद्यातत्कार्यरूपतमो
हीनं आदित्यवर्णं तमसः परस्तादित्युक्तेः सर्वव्यापिनं सर्वव्यापित्वादिवात्मानं अततीत्या

आनंदं निर्मलं शांतं निर्विकारं निरंजनं । स
र्वव्यापिनमात्मानं स्वप्रकाशमकल्मषं ॥ २३ ॥

प्नोतीत्यात्मा सर्वव्यापी सर्वभूतांतरात्मेति श्रुतेः स्वप्रकाशं अत्रायं पुरुषः स्वयंज्योतिरि
ति यस्य भासा सर्वमिदं विभातीति श्रुते सदादिशब्दानां कल्पितप्रवृत्तिनिमित्तभेदादपर्या
येन सहप्रयोगः यानि स्वभावस्वत्वेन बोधकानि तेषु तत्काष्ठ्यनुपपत्तिः एवं चापाततः का
ल्पितप्रवृत्तिनिमित्तप्रकारकबोधे हुते शुद्धचित्तस्य श्रुतौ सर्वधर्मरहितत्वेन ब्रह्मात्मतयाथ
र्मो पाकल्पितग्रहे शुद्धनिर्धर्मकब्रह्मबोधः सर्वैः पदैर्भवतीति बोध्यं तत्र च बोधस्यात्मत
त्वस्य बोधार्थं उक्तं अतः शाकृत्यार्थं तत्स्वरूपमकल्मषत्वं भगवती भगवती सीता हनूमते बोधया।

सटीकदक्षिणामूर्ति २३ ॥

श्री॰
म॰ गी॰
बो॰ टी॰
१३

नन्वेवंविधोपास्य जगत्कारणत्वाद्यसंभवात्कस्मिन्निति कुतो जगदुत्पत्त्यादीत्यत आह मामिति मूल
प्रकृतिं सर्वजगदुपादानकारणमित्यर्थः प्रकृतिशब्दस्योपादानकारणे प्रसिद्धेः तदुपादानकार
णानां महदादीनामप्युपादानकारणत्वान्मूलप्रकृतित्वमस्याः मायां तु प्रकृतिं विद्यादिति श्रुति
प्रसिद्धं ब्रह्मणः पृथक्त्वात्ततो भेदाभेदाभ्यां सत्त्वासत्त्वाभ्यां चानिर्वचनीया अनादिमेवैतां मायां परमेश्वरीं च
स्याः ईश्वरस्वरूपाज्ञानरूपत्वेनेति बोध्यं एषा च जीवाश्रितेश्वरसंनिधानात्तद्रूपेणानुवर्तते इति वे
ध्यं मूलप्रकृतित्वमेव सूचयति सर्गस्थित्यंतकारिणीमिति उत्पत्तिस्थितिप्रलयकर्त्रीं नन्वेवं तदेतत्त
वज्ञस्याप्रजायेयेति श्रुतेर्यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंती

मां विद्धि मूलप्रकृतिं सर्गस्थित्यंतकारिणीं तस्य सन्निधिमात्रेण सृजामीदमतंद्रिता ४४

ति ब्रह्मप्रकरणस्थश्रुतेश्च ब्रह्मणो जगत्कारणत्वं लभ्यते नहि तथैतत्त्वत्राह तस्य संनिधीति
यथैंद्रजालिकमायायाः तत्तत्संनिधानेऽपि स्वयाइंद्रजालिकं विना न स्वकार्यसामर्थ्यं तस्याः एवं तत्संवि
धानेनैव जगत्स्रष्टृत्वमिति तत्रोत उपचारः यथा पट्टराज्ञी वैशिष्ट्येनैव सिद्धस्वरूपस्य राज्ञः स्वस्य स्व
स्व संबंधतत्संकल्पवशवर्तिनी रहेणीत यथा माया वैशिष्ट्येनैव सिद्धस्येश्वरस्य स्वसंगमात्तत्संक
ल्पवशवर्तिन्यहमित्याह अनंदत्तात्तत्संकल्पितार्थैर्निरालस्येत्यर्थः तदुक्तं वाल्मीकीये रामं प्रति क
लवचनेनं संतिष्ठ हरपरान्लोकानेकत्वं मायया सह भार्यया स्वभयादेवामांतेश्वर्वं प्रजीजनरति

पंचवक्त्रसमखिलेशनाहितामृतमेतमावदृशः ॥ ४४ १३

यद्यपि मायाशबले ईश्वरे एव जगदुपादानत्वं निमित्तत्वं च जगतस्तदुपादानं मायामा
दायेत्तामसी निमित्तत्वञ्च सत्त्वात्तामच्यते ब्रह्मतत्त्वमिति अभियुक्तोक्तेस्तथापि विशिष्टस्य
विशेषणे विशेष्ये च समानतिरेके मायायोगात्स्वभगवत्यारोपेणोक्तत्त्वाच्च व्यवहारस्या

तस्मात्त्रिधात्मया सृष्टं तस्मिन्नारो
प्यते बुधैः अयोध्यानगरे जन्म रघु
वंशेतिउत्तमेले २५ विश्वामित्रसहायत्वं
मखसंरक्षणं ततः अहल्याशापशमनं
चापभंगो महेशितुः २६ मत्पाणिग्रह
णं पश्चाद्भार्गवस्य मदक्षयः अयोध्या
नगरे वासो मया द्वादशवार्षिकः
॥२७॥

ह तदिति यत्तस्मात्त्रिधात्मया सृष्टमतस्तत्त्वष्टृत्वादि अबुधैस्तत्स्वरूपानभिज्ञै
स्तत्रारोप्यते रजोसत्त्वेइति भावः एतदेव दर्शयितुं कानिचित्स्वकृतानि तत्राप्या
णि दर्शयति अयोध्येत्यादि २६ ॥२७॥ ॥

श्री॰
अ॰ रा॰
बा॰ टी॰
ख

मायामारीचमरणं मायया गृहीतमृगरूपमारीचमरणमित्यर्थः मायासीताहृतिरिति तदुक्तं कूर्मपुराणे उत्तरखंडे चतुस्त्रिंशोध्याये रामस्य सुभगां भार्यां रावणो राक्षसेश्वरः सीतां विशालनयनां चकमे कालनोदितः गृहीत्वा मायया वेषं चरंतीं विजने वने समाहर्तुं मनश्चक्रे तापसः किल कामिनीं विज्ञाय सा च तद्भावं स्मृत्वा दाशरथिं पतिं जगाम शरणं वह्निमावसथ्यं शुचिस्मिता नमस्ये पावकं देवं साक्षिणं विश्वतोमुखं आत्मानं दीप्तवपुषं सर्वभूतहृदि स्थितं

दंडकारण्यगमनं विराधवधमेव च मायामारीचमरणं मायासीताहृतिस्तथा ३८
जटायुषो मोक्षलाभः कबंधस्य तथैव च शबर्याः पूजनं पश्चात् सुग्रीवेण समागमः ३९
वालिनश्च वधः पश्चात्सीतान्वेषणमेव च सेतुबंधश्च जलधौ लंकायाश्च निरोधनं ४०
रावणस्य वधो युद्धे सपुत्रस्य दुरात्मनः विभीषणे राज्यदानं पुष्पकेण मया सह ४१

इत्यादि षट् श्लोकानुक्त्वा इति वह्न्यष्टकं जप्त्वा रामपत्नी यशस्विनी ध्यायंती मनसा तस्थौ राममुन्मीलितेक्षणा अथावसथ्यो भगवान्हव्यवाहो महेश्वरः आविरासीत्सुदीप्तात्मा तेजसा निर्दहन्निव सृष्ट्वा मायामयीं सीतां स रावणवधेच्छया सीतामादाय रामेष्टां पावकोंतर्धीयत कृत्वा तु रावणवधं रामो लक्ष्मणसंयुतः समादायाभवत्सीतां शंकाकुलितमानसः सा प्रत्ययाय भूतानां सीता मायामयी पुनः ४१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ख

विवेशापावकं दीप्तं ददाह ज्वलनो पितां दग्धा मायामयी सीता भगवानग्रदीधितिः रामा
याद्दर्शयत्सीतां पावको मे हि ह्यग्रियः एतत्पतिव्रतानां वै माहात्म्यं कथितं मया स्त्रीणामखो
घशमनं प्रायश्चित्तं परं स्मृतमिति अनेन स्त्रीणामेवेदृधा पदिश्य अग्निप्रवेशो न दोषाय विप
रीतं वै पापहरश्चेति सूचितं वाल्मीकीये पि मारीचवधाध्याये गते रामे राम हृतेन तेन राम शाह सु
टे शाखा हे राज्ञो शोकते लक्ष्मणस्य रामरक्षार्थं गमनप्रेरणावसरे आरण्यकांडे अपि नाम सह
रामेणायं पापेयं पुनरागतः लक्ष्मणेनैवमुक्ता तु रुदंती जनकात्मजा प्रत्युवाच ततो वा
क्यं तीव्रं बाष्पपरिप्लुता गोदावरीं प्रवेक्ष्यामि हीना रामेण लक्ष्मण आबधिष्ये त्यक्ष्ये वा त्यहं
विषमे देहमात्मनः विषमे भूस्वादोऽप्यित्वा ततः प्रयातेनेत्यर्थः पिबामि वा विषं तीक्ष्णं
प्रवेक्ष्यामि हुताशनं न त्वाहं राघवादन्यं कदापि पुरुषं स्पृशे इति सीतोत्त्या सूचितायमर्थः
अन्यथैवं प्रतिज्ञाय रावणशरीरस्पर्शो जन्मा तु प्रतिज्ञाहानिः स्यात् तस्मात्प्रवेक्ष्यामि हु
ताशनमित्यनेन स्वकर्तव्यार्थं तावोक्तमिति मंतव्यं एतत्प्रवेशादेव हनुमत्पुच्छ
संवद्धाग्निना लंकादाहोपपत्तिः अन्यथा रावणोवशीकृतेन लोकपाला
ग्निना कथं तन्नगरदाहः स्यात् एतच्छुक्तिप्रवे
शावतस्पस्यानं अहान्याय
पतिव्रिरत्पले ३८
श्री ५ बं था

श्री
अ. रा.
बा. टी.
१५

एवमादीनि ब्रह्मणोभोदानादीग्राण्याणि निर्विकारे जन्मादिरहिते अरोपयंति एवं जरा
कर्तृत्वादिकमपि मयि निर्गुणे एव रामे आरोपयंतीत्यर्थः ४२ निर्विकारत्वमेव रामस्योपपादयु
ति राम इति निष्कलं निष्क्रियं शांतमित्यादिश्रुतेः आनंदमूर्तिरानंदस्वरूपः अचलः कूटस्था
तएव अपरिणामहीनः मायागुणान् मायया सृष्टपदार्थाननुगतः तदधिष्ठानत्वेनस्थि
तस्तथाविभाति दृष्टिरूपा भाति यथा रज्ज्ववच्छेदेन सर्पाकारोतः करणपरिणाम इति

अयोध्यागमनं पश्चाद्राज्ये रामाभिषेचनं एवमादीनि कर्माणि मय्येवाचरिता
न्यपि आरोपयंति रामेस्मिन्निर्विकारेखिलात्मनि ४२ रामो न गच्छति न तिष्ठ
ति नानुशोचत्याकांक्षते त्यजति नो न करोति किंचित् आनंदमूर्तिरचलः परिणा
महीनो मायागुणाननुगतो हि तथा विभाति ४३ महादेव उवाच ततो रामः स्वयं
प्राह हनूमंतमुपस्थितं शृणु तत्त्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मना ४४ ॥ ॥

रज्जुः सर्पात्मना भाति यत्तदेव विवर्तोपादानत्वमित्याहुः सच सर्पाकारोंतःकरणपरिणा
मः सत्त्वासत्त्वाभ्यामनिर्वचनीय इत्युच्यते एवं प्रपंचोप्यनिर्वचनीय इति दिक् ४३ उपा
धियंते आत्मनो द्वितीयत्वे जीवेश्वरादि वक्ष्याकथमिति जिज्ञास्यायापन्ने आत्मा ईश्व
रनाम्ना विदाभासो जीवः परात्मा शुद्धचैतन्य ४४ ॥ ॥ ॥ ॥ ॥ ॥ १५

तेषांतत्वमेवस्पष्टांतमाहाकाशस्येति एकस्याकाशस्यत्रिविधोभेदः महाकाशोजलाश
यावछिन्नाकाशः प्रतिबिंबाकाशश्चेतिभेदात् तदेवाह महानितिमहाकाशइत्यर्थः सएा
वमहाकाशोजलाशयेतदवछिन्नएवभवति तत्रैवजलाशयेपरंप्रतिबिंबाख्यंदृश्यते।
एवंनभस्त्रिविधमित्यर्थः ४५ एवंदृष्टांतमभिधायदार्ष्टांतिकमाह बुद्धीति सर्वबुद्धीसा
दितयाबुद्ध्युपहितंचैतन्यं पूर्णांडपार्थिमंडलस्यविधुन्नादित्यः सकलबुद्धिसमष्टिरेवमा।

आकाशस्ययथाभेदस्त्रिविधोदृश्यतेमहान् जलाशयेमहा
काशस्तदवछिन्नएवहि प्रतिबिंबाख्यमपरंदृश्यतेत्रिविधं
नभः ४५ बुद्ध्यवछिन्नचैतन्यमेकंपूर्णमथापरं आभास।
स्त्वपरंबिंबभूतमेवंत्रिधाचितिः ४६ ॥ ॥ ॥

येतितदवछिन्नंचैतन्यमीश्वरइत्यर्थः अथापरंआभासस्तत्तबुद्धिप्रतिबिंबभूतोजीवइत्यर्थ
र्थः अपरंबिंबभूतएवंचितिस्त्रिधेत्यर्थः आभासस्त्वपरंबिंबभूतमितिपादेबुद्ध्यवछिन्नचै
तन्यमेकमित्यनेनेश्वरः पूर्णमथापरमित्यनेनशुद्ध आभासस्त्वपरमितिजीवः जीवत्व।
मेवस्फुटयतिबिंबभूतमितिबिंबशब्देनजाग्रदवस्थाभिमानी विश्वतिदेहेंद्रियादिष्वितिश्रु
त्यतेः एतत्प्रतिबिंबाकाशस्थानीयमितित्रिचितिरित्यर्थंदृष्टान्तः तत्रद्वौमिथ्याभूतौ उपाध्या

चित्र ५४

श्री. अ. पं. टी. ९

नन्वेवं मूढचैतन्ये साक्षीति व्यवहारानुपपत्तिः साक्षाद्द्रष्टा हि साक्षी न च मूढचैतन्ये द्रष्टृत्व
मित्यत आह साभासेति आभासेन चेतनप्रतिबिम्बेन सहितायाः बुद्धेरन्तःकरणस्येत्यर्थः तन्नु
नेकर्तृत्वं मन्दबुद्धिः साक्षिणि आरोप्यते तेनायं साक्षीति पदवाच्य इत्यर्थः अयमाशयः जानातीत्य
हावतः कर्तृत्वविशेषणरूपा क्रियायास्ताधात्म्यवाच्या आभासविशिष्टेयमिति द्रष्टुराशयः यदा
स्तादात्म्येनाभासबुद्ध्योर्विवेकाग्रहात् तदुक्तमाचार्यैः आत्माभासस्तु तिङ्वाच्यो धा

साभासबुद्धेः कर्तृत्वमविच्छिन्नेऽविकारिणि। साक्षिण्यारोप्यते भ्रान्त्या जीवत्वं च तथा‌ऽबुधैः ॥ ४८ ॥

त्वर्थस्तु धियः क्रिया उभयं चाविवेकेन जानातीत्युच्यते मूढबुद्धेः कर्तृत्वमध्यास्य जानाती
त्युच्यते तथा चैतन्यमाध्यस्य तन्नेव बुद्धिदेहोच्यते इति आत्माभास इति बहुव्रीहिः धियो
ऽन्तःकरणस्य तद्देवाह उभयं चेति मूर्खा चेति आभासबुद्धिताक्रियाणां मिथ्यात्वात् अयं
विवहारोपि मिथ्येत्यर्थः एवं च साभासबुद्धिगतं दृष्टं तस्याः विच्छिन्नेः परिच्छिन्नेः विकारि
णि साक्षिणि अविद्याद्वात्म्यापन्नाभासतादात्म्याध्यासेनारोपः तथा जीवो नित्यः सा
न्य इत्यादिव्यवहारात् जीवत्वमपि तत्रारोप्यत इत्यर्थः ४८ ॥ ॥ ॥ ॥ ९

आभासमादायतन्न तथात्मब्रह्मत्वसंभवइत्याह आभासस्त्विति तस्यामृषात्वादविद्याका
र्यत्वाच्च तस्यात्मब्रह्मस्य तमादायनोपपत्तिरित्यर्थः न दृश्यत्वेनामृषात्वमोक्तिमिथ्यात्वात्र दर्शना
दृश्यत्वमभादित्युक्तमर्थं विनिर्बाधानुभवात् अतएवासाववियाकार्यो जीवाख्यमेविद्याद्भूर्भ्यो
त्वयाध्यासिकत्वनुवास्तवमितिबोध्यं आभासासत्यत्वं वाक्यप्रपंचितं वित्तरभयान्नेहोच्य
ते ननु तत्रैवविछेकिंचित्रवास्तवं नेत्याह अविछिन्नं विछेदो भेदस्तद्रहित ननु एवंविधा
चितिरित्यसंगतत्राह विछेदइति भेदइत्यर्थः विकल्पितः उपाध्याससमृतइत्यर्थः

आभासकर्तृबुद्धिरविद्याकार्यमुच्यते अविछिन्नं तत्त्वब्रह्म सविछेदस्तु विक-
ल्पितः ४८ अविछिन्नस्य पूर्णेन एकत्वं प्रतिपाद्यते तत्त्वमस्यादिवाक्यैश्च साभा
सस्याहमस्तथा ४९ ॥

एवंजीवानांभिन्नस्वरूपभेदोप्यद्वैताभासाकृतएवेतिबोध्यं ४८ कल्पितभेदस्यैवप्रमाणमा
ह अविछिन्नस्येति अवछेदोभेदस्तद्रहितः आध्यासिकभेदवतः साभासस्याहमस्तत्त्वमस्या
दिवाक्यैः पूर्णेनैक्यं वेदाएकत्वंप्रतिपाद्यतेतत्तथातथासतिकल्पितभेदस्यतिउपपद्यते
इतिभावः सर्वथाभेदाभावेतथानर्थकं वास्तवभेदेतदानर्थक्यंवास्तवस्यवचनशाते
नाप्यनिवृत्तेरितिभावः अत्रावछिन्नस्यसाहमस्यनेनतत्त्वपदार्थोदर्शितः पूर्णेनेत्यनेनतत्पदा

पं॰ टी॰

वे

एतदेव धनयन् तदुपदेशफलमाह ऐक्येति आत्मनो जीवेश्वरयोः ऐक्यज्ञानं ब्रह्मास्मीति ज्ञानं य
देति कर्मानुष्ठानात् पापक्षये समुत्पन्ने कषायकर्मभिः पक्वे तेनो ज्ञानं प्रवर्तत इति सूत्र त चयभावं
जीवेश्वरयोरुपाधिभिन्नयोरैक्यं श्रुत्याचमानवाधितं सततमन्वपदयोरुपाधिरहिते लक्षणा
याविंवभूतस्य ब्रह्मैक्यपरतयापर्यवसानमिति वोध्यं एतद्व्याकरिविस्तरेण प्रपंचितं ऐक्य
ज्ञानफलमाह तदेति नादृष्टज्ञाने सतिनिर्धर्मकत्वेन चिन्मात्रतया तत्त्वंपदज्ञानात् तत्त्वम
पदज्ञानरूपाः विद्यास्वकार्यैः प्रपंचैः सह नष्टप्रत्येव नसंशयः एतेन दग्धबीजवत्कार्यातिन
नसामर्थ्यमेव तस्याज्ञानेनक्रियत इति पतोपालः तदुक्तमाचार्यैः सोपमित्यादिवाक्येभ्यो विद्या

ऐक्यज्ञानं यदोत्पन्नं महावाक्येन चात्मनोः तदाविद्यास्वकार्यैश्च नष्टप्रत्येव न संशयः ५०

धातदि तं तयोस्त्यागेनभागयोरेकभागश्रयोलक्षणते यथा मायाविद्यविहायैवमुपाधीपरजी
वयोः अखंडं सच्चिदानंदः परंब्रह्मैवलक्ष्यते यथा सोयंदेवदत्त इत्यादौ सर्वान्दभूतत्वरूपतत्ता
याइदानीमनुभूयमानत्वरूपेदंतायाश्च त्यागेन देवदत्तस्वरूपमात्रं लक्ष्यते मायाब्रह्म समष्टि
रविद्याव्यष्टिरूपेतिवोध्यं प्रयोतज्ज्ञानं मननादिसंस्कृतांतःकरणादेवदृश्यते त्वग्र्यया बुद्ध्या
इतिस्मृतेः सूक्ष्मया मननादिसंस्कृतया शास्त्राचार्योपदेशशमदमादिसंस्कृतेन मनसात्मदर्श
नेकरणमिति गीताभाष्याच्चेत्यादिकं उक्तं च नारदीये न ब्रह्मस्त्यादिवाक्यात् ज्ञानं मोक्ष
स्य साधनमिति श्रुतिरपि तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति ५०॥ २

ईदृशाज्ञानस्यमरवोंसाधनमाह एतदितिमद्भक्तइति ईश्वरगर्भविशेषणं मद्भावोमत्सायु
ज्यमुक्तिंकारणत्वदार्ढ्यायभक्तिव्यतिरेकेकार्यव्यतिरेकमाह मद्भक्तोतिशास्त्रगर्तेषुशा
स्त्रबोधितक्रियाकलापरूपगर्तेषु ५१ ममात्मनःसद्रूपस्यचेतनस्य ५२ ५३ सर्ववेदां।

एतद्धितायमद्भक्तोमद्भावायोपपद्यते मद्भक्तिविमुखानांहिशास्त्रगर्तेषुमु
ह्यतां नज्ञानंनचमोक्षःस्यात्तेषांजन्मशतैरपि ५१ इदंरहस्यंहृदयंममात्मनो
मयैवसाक्षात्कथितंतवानघ मद्भक्तिहीनायशठायपापिने दातव्यमैन्द्रादपि
राज्यतोधिकं ५२ श्रीमहादेवउवाच एतत्तेभिहितंदेविश्रीरामहृदयंमया
अतिगुह्यतमंहृद्यंपवित्रंपापशोधनं ५३ साक्षाद्रामेणकथितंसर्ववेदांत
संग्रहं यःपठेत्सततंभक्त्यासमुक्तोनात्रसंशयः ५४ ब्रह्महत्यादिपापानि
बहुजन्मार्जितान्यपि नश्यंत्येवनसंदेहोरामस्यवचनंयथा ५५ योतिभ्र
ष्टोतिपापीपरधनपरदारेषुनित्योद्यतोवा स्तेयीब्रह्मघ्नमातापितृवधनि
रतोयोगिवृंदापकारी यःसंपूज्याभिरामंपठतिचहृदयंरामचंद्रस्यभक्त्यायो
गींद्रैरप्यलभ्यंपदमिहभजतेसर्वदेवैःसपूज्यं ५६ इतिमामहेश्वरसंवादेअध्या

त्मप्रतिपाद्यार्थसारसंग्रहसंज्ञकं ५४ ५५ प्रतिग्रहस्योपपादकमतिपापीत्यादिसर्वदे
वैःपूज्यंपदब्रह्मलोकंसलभतइत्यन्वयः ५६ इतिश्रीमत्सकलराजन्यपदद्वंद्वरणस्मा।
र्थेत्यादिविरुदावलीविराजमानस्यहिमतिवर्मणःपुत्रस्यश्रीरामवर्मणःकृतौप्रथमा।

त्मरामायणोश्रीरामहृदयंनामप्रथमोध्यायः १

त्मरामायणेसेतौबालकांडेप्रथमोध्यायः १॥

श्री॰
अ॰ रा॰
बा॰ टी॰
१८

अथ पार्वती शिवोक्तमर्थं संदति धन्यास्मीति अतिसंदेहग्रंथिः यदि रामः परंब्रह्म तर्
हि कथं तस्य शोकादि यदि शोकादि तर्हि जीवः कथं तदा पास्यत्वमित्याकारो महान्सं
देहस्तद्रूपा ग्रंथिः विछिन्न निवृत्तः १ भवः संसारस्तमपहंति नाशयति तादृशं रामतत्वामृ

पार्वत्युवाच धन्यास्म्यनुगृहीतास्मि कृता
र्थास्मि जगत्प्रभो विछिन्नोमेतिसंदेहग्रंथि
र्भवदनुग्रहात् १ त्वन्मुखाद्गलितं रामतत्वा
मृतरसायनं पिबंत्याममनोदेव नतृप्यतिभवा
पहं २ श्रीरामस्यकथात्वत्तः श्रुतासंक्षेप
तोमया इदानींश्रोतुमिछामिविस्त
रेणास्फुटान्तरम् ३ ॥ ॥

तरसायनं रामतत्वरूपामृतजनकं मोक्षजनकं रसायनं पिबन्त्या मे मनो न तृप्यति
२ पुनर्विस्तरेण रामस्य कथा पृच्छति श्रीरामस्येति स्फुटान्तरमिति क्रियाविशेषणं ३ १८

अथ महादेवस्तां कथां विवक्षुस्तत्र श्रोतृप्रवृत्तये तत्फलं सामाह शृणु इति अध्यात्मविद्यया आत्म
सर्वात्मस्वरूपं नयति तया आश्रितस्य रामस्य चरितं तदद्य अनुरूपकाले ४ तापत्रयं आध्यात्मि
काधिभौतिकाधिदैविकाख्यं दुःखत्रयं तत्राद्यं रोगादिजं कामक्रोधादिजं द्वितीयं चोरादि
निमित्तं तृतीयं ग्रहपीडावशानिमित्तं ५ कथां प्रस्तौति भूमिरिति रक्षोगणानां भारेण

श्रीमहादेव उवाच शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत्
अध्यात्मचरितं रामेणोक्तं पुरा मम ४ तदद्य कथयिष्यामि
शृणु तापत्रयापहं यच्छ्रुत्वा मुच्यते जंतुरज्ञानोत्थमहाभयात् ८
प्राप्नोति परमामृद्धिं दीर्घायुः पुत्रसंततिं ५ भूमिर्भारेण मग्ना द
शवदनमुखाशेषरक्षोगणानां धृत्वा गोरूपमादौ दिविजमु
निजनैः साकमब्जासनस्य गत्वा लोकं रुदंती व्यसनमुपगता
ब्रह्मणे प्राह सर्वं ब्रह्मा ध्यात्वा मुहूर्तं सकलमपि हृदावेदशे

मग्ना सती धात्री जले मग्ना गोरूपं धृत्वा देवादिभिः सह अब्जासनस्य ब्रह्मणो लोकं गत्वा ब्रह्मण उ
पगता स्वयं प्राप्तं सर्वं व्यसनं प्राह सच मुहूर्तं ध्यात्वा सकलं दुःखकारणं तन्निवृत्तिकारणं
च हृदा वेत् अजानात् तत्र हेतुः अशेषात्मकत्वात् सर्वसाक्षित्वमहिमरूपत्वात् इत्यर्थः ६

श्री॰ स्त॰ रा॰ बा॰ टी॰ १९

तस्मादिति अनंतरमिति शेषः तदनंतरं ध्यानानंतरमित्यर्थः देव्या च भूम्या च सहित इति
शेषः अखिललोकहृत्स्थं सर्वांतर्यामिणमित्यर्थः सर्वाण्येष आत्मान्तर्यामीति श्रुतेः अजरं एष
महतात्मा अजर इति श्रुतेः सर्वज्ञं यः सर्वज्ञः सर्वविदिति श्रुतेः ईशानं एष सर्वेश्वर इति श्रुतेः

तस्मान्नीरसमुद्रतीरमगमं संस्तूय तं दैवतं देव्या चाखिललोकहृत्स्थमजरं
सर्वज्ञमीशं हरिं भक्त्याभीष्टुति सिद्धनिर्मलपदैः स्तोत्रैः पुराणोद्भवैर्भक्त्या गद्गद
यागिरातिविमलैरानंदवाष्पैर्वृतः ७ ततः स्फुरत्सहस्रांशुसहस्रसदृशप्र
भः आविरासीद्धरिः प्राच्यादिशां व्यपनयंस्तमः ८ कथंचिद्दृष्टवान्ब्रह्मा
उदंभामकृतात्मना इंद्रनीलप्रतीकाशं स्मितास्यं पद्मलोचनं ९ किरीटहा =
रकेयूरकुंडलैः कटकादिभिः विभ्राजमानं श्रीवत्सकौस्तुभप्रथयालिंगितं १० =
स्तवद्भिः सनकाद्यैश्च पार्षदैः परिवेष्टितं शंखचक्रगदापद्मवनमालाविराजि॰ ११

हरिं हरामयं हि स्मर्तॄणां हविर्भागं क्रतौ तथा वर्णाश्रमे हरिर्यस्मात्तस्माद्धरिरहं स्मृत
इति स्मृतेः श्रुतिसिद्धनिर्मलहरिविलसच्छ्रुतपदपुंजैः पुराणोद्भवैः स्तोत्रैरित्यर्थः भ
क्तिमूलिकैव गद्गदवाणी भक्तिर्जिता देवानां देवाष्यागां विमलत्वं ७ सहस्रांशुसा
हस्रसूर्यसहस्रं ८ अकृतात्मनां ज्ञानहीनानां तेजोराशित्वात् कथंचिद्दर्शनं ९ पार्षदाः १९

स्वर्णैर्वर्णैर्वर्णयितां वरं १२ १३ प्राणाः क्रियाशक्तिप्रधानोंशः तेन कर्मेंद्रियसंग्रहः बु
द्धींद्रियाणि श्रोत्रादीनि आत्मा मनस्तैः करणभूतैर्नतोस्मि कर्मपाशान्मुमुक्षुभिर्यत्पदं हृ
दि चिंत्यते इत्यन्वयः १३ गुणमय्या आत्मस्वरूपमत्तमो गुणगुणत्रयात्मया मायया स्वविषयाज्जगत्सृ
जसि तेन सृष्ट्यादिना ते लेपः हे स्वदृष्ट्याद्यभिमानेन तत्र हेतुगर्भविशेषणं आनंदात्म

स्वर्णयज्ञोपवीतेन स्वर्णैर्वर्णैर्वरेण च ॥ श्रिया भूम्या च सहितं गरुडोपरि सं
स्थितं ॥ हर्षगद्गदया वाचा स्तोतुं समुपचक्रमे १२ ब्रह्मोवाच नतोस्मि ते पदं दे
व प्राणबुद्धींद्रियात्मभिः यच्चिंत्यते कर्मपाशाद्धृदि नित्यं मुमुक्षुभिः १३ मा
यया गुणमय्या त्वं सृजस्यवसि लुंपसि जगत्तेन न ते लेप आनंदात्मन् भवात्मनः
१४ तथा शुद्धिर्न दुष्टानां दानाध्ययनकर्मभिः शुद्धात्मनां ते यशसि सदा भक्ति
मतां यथा १५ अतस्त्वं वाङ्मिर्मे दृष्टचित्तदोषापनुत्तये सद्योंतर्हृदये नित्यं मु
निभिः स्तोतव्योऽर्हतः १६ ॥

भवात्मनः आनंदाभिन्नात् भवरूप आत्मा यस्य तस्य एवं च
स्वस्वरूपावरणत्वेन सर्वत्र मिथ्यादृष्ट्या तदभिमानरहित इति भावः १४ दुष्टानां मलिना
तःकरणानां शुद्धात्मनां शुद्धांतःकरणानां ते यशसि गुणकीर्तने १५ सा त्वं ते भक्तैर्हे
तोंतर्हृदये सद्योदृष्टात्मवाङ्मिर्मे चित्तदोषापनुत्तये स्थितिशेषः १६ ॥ ॥ ॥ ॥

श्री भ० पु० बा० टी० २०

स्वार्थेसिद्ध्यर्थे स्वकं तेभ्य ह्यस्मादिसिद्ध्यर्थः ज्ञानभिः ज्ञानेच्छुभिः १८ स्पत्निवत् आर्षो ह्रस्वः
सपत्नीवदित्यर्थः १९ यतः स्वचरणभक्तोऽद्भुतत्वलक्ष्मीतोऽप्यधिका भक्तिः प्रीतिर्यतः सारवेदिन
स्त्वद्भक्तास्त्वच्चरणयोर्भक्तिमेवावांछंति २० अत इति यतस्त्वद्भक्तिरेव संसाररोगभेषजे अत

ब्रह्माद्यैः स्वार्थसिद्ध्यर्थमस्माभिः सर्वसेवितः अपरोक्षात्वनुभूत्यर्थं ज्ञानिभिर्हृदिभा
वितः १८ तवांघ्रिपृक्तनिर्माल्यतुलसीमालविभो स्पृर्द्धंते वक्षसि पदं लब्ध्वापि श्री
सपत्निवत् १९ अतस्त्वत्पादभक्तोद्भुतत्वभक्तिः श्रियोऽधिका भक्तिमेवाभिवांछंति।
त्वद्भक्ताः सारवेदिनः २० अतस्त्वत्पादकमले भक्तिरेव सदास्तु मे संसारामय
तप्तानां भेषजं भक्तिरेव ते २१ इति ब्रुवंतं ब्रह्माणं बभाषे भगवान्हरिः किं करो
मीति तं वेधाः प्रत्युवाचातिहर्षितः २२ भगवान् रावणो नाम पौलस्त्यतनयो
महान् राक्षसानामधिपतिर्मद्दत्तवरदर्पितः २३ त्रिलोके लोकपालांश्च बाधते
विश्वबाधकः मानुषेण मृतिस्तस्य मया कल्याणकल्पिता अतस्त्वं मानुषो भूत्वा

इत्यन्वयः २१ ब्रह्माणं हरिः किं करोमीति बभाषे अथ तं हरिं वेधाः प्रत्युवाचेति संबंधः २२।
रावण इति रावयामास लोकान् यतस्माद्रावण उच्यते इति भारतोक्तेः माया ब्रह्मणा दत्ते
न वरेण दर्पितो हृष्टः ततः वरश्च मनुष्यान्विना वध्यत्वरूपः २३ तदेवाह मानुषेणेति २४

२०

कश्यपस्य तपसा तोषितेन मे मया तस्मै वरो दत्तः यत्त्वं याचिष्यसि तत्तुभ्यं दास्यामीति क
त्तवरदानप्रतिज्ञ इत्यर्थः ततस्तेनाहं पुत्रभावाय याचितो मया च तत्तथेत्यङ्गीकृतमित्य
र्थः २५ अहं तस्य पुत्रतामेत्य पुत्रत्वं प्राप्स्यामीति संकल्प्य कौशल्यायामितरयोः सुमित्रा।
कैकेय्योर्वहमेवात्मानं च तद्धा चतुः प्रकारावयवसंस्थानैः रामलक्ष्मणभरतशत्रु।

श्रीभगवानुवाच कश्यपस्य वरो दत्तस्त
पसा तोषितेन मे याचितः पुत्रभावाय तथे
त्यङ्गीकृतं मया २५ स इदानीं दशरथो भूत्वा तिष्ठ
ति भूतले तस्याहं पुत्रतामेत्य कौशल्यायां शुभे दिने
२६ चतुर्द्धात्मानमेवाहं सृजामीतरयोः पृथक् यो
गमायापि सीतेति जनकस्य गृहे तदा २७ उत्पत्स्य
ते तया सार्द्धं सर्वं संपादयाम्यहं २८ इत्युक्त्वान्त
र्दधे विष्णुर्ब्रह्मा देवानथाब्रवीत् विष्णुर्मा

घ्नेति चतुःप्रकारताम भिसृजामि सृजामि त्वद्वा
ऽभिवर्तमानमात्मानं सामीप्ये लट् २६ २७ योगमायेति योगो मत्संकल्पस्तद्वशवर्तिमायेत्यर्थः ना
हं प्रकाशः सर्वस्य योगमायासमावृत इति गीतोक्तेः तया सार्द्धं तां समाहृकारिणीं प्राप्य २८ २९

श्री॰
अ॰रा॰
बा॰टी॰
२१

ऽंशासंभवान् स्वस्वांशासंभवान् वानरानित्यर्थः ३० ३१ इतस्ततः पर्वतवनेषु ३२ ३३

स्वयं सृजध्वं सर्वेऽपि वानरेष्वंशसंभवा
न् विष्णोः सहायं कुरुत यावत्स्थास्यति
भूतले ३० इति देवान्समादिश्य समाश्वास्य
च मेदिनीं ययौ ब्रह्मा स्वभवनं विज्वरः सुखमा
स्थितः ३१ देवाश्च सर्वे हरिरूपधारिणः स्थिताः
सहायार्थमितस्ततो हरेः महाबलाः पर्वतवृ
क्षयोधिनः प्रतीक्षमाणा भगवंतमीश्वरं
३२ इति श्रीमदध्यात्मरामायणे उमामहे
श्वरसंवादे बालकांडे द्विती
योऽध्यायः २ रामायन
मो नमः॥

इति श्रीमत्सकलराविपदुत्तरणामर्थेमत्यादिविरुदावलीविराजमानस्य हिम्मतिव
र्मणः पुत्रस्य श्रीरामवर्मणः कृतौ अध्यात्मरामायणसेतौ बालकांडे द्वितीयोऽध्यायः २ २१

अयुयामादिजन्माहाथेति १ २ सर्वैर्दुःखायेतिमनुष्यलोकः पुत्रैर्नौवजयोनान्येन
कर्मणेतिश्रुते ३ ४ शान्ताभर्तारं शान्तालोमपाददशरथस्यांगपतेरेतद्दशरथमित्र

श्रीमहादेवउवाच अयोध्याजादशरथः श्रीमान्सत्यपरायणः अयो
ध्याधिपतिर्वीरः सर्वलोकेषुविश्रुतः १ सोनपत्यतदुःखेनपीडितोऽ
नमेकदा वसिष्ठंस्वकुलाचार्यमाहूयेदमभाषत २ स्वामिन्पुत्राः
कथंमेस्युः सर्वलक्षणलक्षिताः पुत्रहीनस्यमेराज्यंसर्वंदुःखायक
ल्पते ३ ततोब्रवीद्वसिष्ठस्तंभविष्यंतिसुतास्तव चत्वारः सत्वसंपा
न्नालोकपालाइवापराः ४ शान्ताभर्तारमानीयऋष्यशृंगंतपोधना
न अस्माभिः सहितःपुत्रकामेष्टिंशीघ्रमा
चर ॥५॥ रामः

स्वकन्यानेनराज्ञाननोलब्धास्वडुहितृत्वेनकल्पितेत्याख्यायिकापुत्रकामस्य कर्तव्ये
ष्टिः पुत्रकामेष्टिः ५ ॥ ॥

श्री॰ अ॰रा॰ बा॰टी॰ २२

मुनिं ऋष्यशृंगं मुनिभिर्वसिष्ठाद्यैः ५ तप्तजांबूनदं हृतमलापहरणं स्वर्णं तदग्निकांतिं हव्यवा
डग्निः अथमेव प्राजापत्यं नरं विद्धि मामिह ह्याभ्यागतं नृपेति वाल्मीकीये प्राजापत्यपाहतो
नः ७ पुत्रीयं पुत्रार्थं हितं ८ मुनिपाहस्तौ वसिष्ठऋष्यशृंगौ ९ १० जगृभुः गृहीतवंतः

तथेति मुनिमानीय मंत्रिभिः सहितं शुचि यज्ञकर्म समारेभे मुनिभिर्वीतकल्मषैः ५ अग्रहयाह्यमाने प्तोतप्तजांबूनदप्रभं पायसं स्वर्णपात्रस्थं गृहीत्वोवाच हव्यवाट् ७ गृहाण पायसं दिव्यं पुत्रीयं देवनिर्मितं लप्स्यसे परमात्मानं पुत्रत्वेन न संशयः ८ इत्युक्त्वा पायसं दत्वा राज्ञे सोन्तर्दधेनलः एवं देवर्तिपाहस्तौ राजा लब्धमनोरथः ९ वसिष्ठऋष्यशृंगाभ्यामनुज्ञातो ददौ हविः कौशल्यायै सकैकेय्यै अर्धमर्धं प्रयत्नतः १० ततः सुमित्रा संप्राप्ता जगृभुः पौत्रिकं चरुं ॥१॥

स्वावती रघुअभिकांतायामित्यतो यऽलवंतादावामपाह्वानित्यमेन रुगभावेत्रसि सुधि
सुधितिवैः कृतिनिक्रोहृपंपौत्रिकं चरुमिति षष्ठभावः अर्थः पुत्रः प्रयोजनमस्य तादृशं च २२

स्वभागार्द्धं स्वयाहस्वात्मीयवाचीतीयस्वभागः स्वभागस्तदर्द्धं स्वदत्तस्य च तयोर्भागमित्य
र्थः एवमग्रेपि वाल्मीकीयेपि कौशल्यायै नरपतिः पायसार्द्धं ददौ तदा अर्द्धादर्द्धं द-
दौ चापि सुमित्रायै नराधिपः कैकेय्यै चावशिष्टार्द्धं ददौ पुत्रार्थकारणात् प्रददौ चावा-
शिष्टार्द्धं पायसस्यामृतोपम अनुचिंत्य सुमित्रायै पुनरेव महामतिरिति श्लोकयोः कौ-
शल्यायै दत्तार्द्धं च तुर्थांशास्वं सुमित्रायै ददौ कौशल्ययादापितवानित्यर्थः कार्थः
अर्द्धादित्यत्र कस्याद्धादित्याकांक्षायामुपस्थितकौशल्यादत्तपायसार्द्धात्यस्योचित्या

कौशल्यातु स्वभागार्द्धं ददौ तस्यै मुदान्विता कैकेयी च स्वभागा
र्द्धं ददौ प्रीतिसमन्विता उपभुज्य चरुं सर्वाः स्त्रियो गर्भसमन्विताः
१२

त् अंतर्भावितण्यर्थस्ये मानं चैतदेकवाक्यतैव एवं कैकेय्यै कौशल्यादत्तार्धादवशि
ष्टमर्द्धं ददौ ततः कौशल्यादत्तावशिष्टस्य कैकेय्यै दत्तस्य यदर्द्धं तदर्द्धं विचार्य पुनरपि सु
मित्रायै ददौ दापयमासेत्यर्थः अत्र चार्द्धाद्यदाद्युक्तिर्बोध्या एवं हि पूर्वत्र ग्रन्थेन तस्यैकवाक्य
ताभवति ततश्च तत्र भगवज्जन्मस्य तत्पुत्राधीनतो चितेन एवमेवोचितं सेव्यसेवकभाव
लाभार्थं ततस्तत्तान्नृनां शास्त्रस्य लक्ष्मणशत्रुघ्नयोर्योचित्यादित्वाऽत्र स्वभागार्धमित्यथा
ख्याते न व्याख्यातं कालिदासोपि स तेनांशैस्त्रयं पत्नीर्विभेजे चरुसंततिं १२ ॥ ॥ ॥

श्री
रा०रा०
बा०टी०
२३

द्यावापृथिव्योः प्रत्ययमहार्घ्यं इति विधातयं अर्चितानस्य कौशल्यायै प्रियायै केकयवंशजायै अतः
सभाविता ताभ्यां सुमित्रायै उक्तैरीश्वरः तेन हृतस्य चितते पत्न्याः पायसमहो इति तः चतुर्थांशे
भागाभ्यां तामयोजय तामुभे साहित्य्यवतायवत्या मीन्नपत्न्योरुभयोः रग्रिहस्ताद् चतुर्थ
धार्धभागाभ्यामित्यस्य स्वस्व लब्धचरुभागार्धार्धभागाभ्यामित्यर्थः एवं च रामभरतौ त्रि
त्रयौ लक्ष्मणशत्रुघ्नौ चरुसांशाविति सिद्धवाल्मीकीयव्याख्यातारोक्तकाचार्यश्रीरा
माचार्यवर्य्यैवमेवोचतः अन्ये तु तत्राप्याख्यातारः कौशल्यायै तं हणायाय सार्धं ददौ ततः या

देवताश्ववरेजलाः सभा सा राजमंदिरे ददामे मासि कौशल्या सुषुवे पुत्रमद्भुतं ॥

तु स्यादर्धार्धं सर्वे पायसचतुर्थांशं सुमित्रायै दत्तवान् स्वयमेव ततः पाद्वेवशिष्टस्य चतु
र्थांशस्यार्धं सष्टमांशं कैकेय्यै दत्तवान् ततः पुनरवशिष्टमर्धं सष्टमांशं हव्यं पुनरपि सु
मित्रायै दत्तवानिति यथा श्रुतयाहिणाव्याचक्षते तेषामेतद्विरोधो रामलक्ष्मणयोरेव भा
वतमात्र्ययो देवैकवाक्यतायावीजालाभश्चावशिष्टार्धपदे च चिन्त्यं हीनत्वकृतः क्वचि
त्कर्मधारयश्वेति वै घमंच ॥ सभागाद्धमिति प्रायवत १२ १३ ॥ २३

मधुमासे चैत्रे सितशुक्ले कर्कटे लग्ने पुनर्वसुनक्षत्रसहिते पुनर्वसुनक्षत्रसहिते इति कर्क
टलग्नविशेषणं ग्रहपंचके चंद्रबुधशनिवर्ज्जरविभौमगुरुभृगुशनिरूपे तदुच्चस्थानानि
चक्रमेणमेषमकरकर्कमीनतुलाख्यानि १४ एवंग्रहास्तादपरस्याभ्याधीनत्वात् उच्च
स्थाने स्फुट इति मेषमिति तेन सर्वेषामनन्तरागं संबन्धिते पुष्पवृष्टिसमाकुले काले इत्यर्थः १५

मधुमासे सिते पक्षे नवम्यां कर्कटे शुभे पुनर्वस्वृक्षसहिते उच्चस्थे ग्रहपंचके १४
मेषं पूषणि संप्राप्ते पुष्पवृष्टिसमाकुले आविरासीज्जगन्नाथः परमात्मा सनातनः १५
नीलोत्पलदलश्यामः पीतवासाश्चतुर्भुजः जलजारुणनेत्रान्तः स्फुरत्कुंडलमंडितः
१६ सहस्रार्कप्रतीकाशः किरीटी कुंचितालकः शंखचक्रगदापद्मवनमालाविरा
जितः १७ अनुग्रहाख्यहृत्स्थेंदुसूचकस्मितचंद्रिकः करुणारससंपूर्णविशा
लोत्पललोचनः श्रीवत्सहारकेयूरनूपुरादिविभूषणः १८ दृष्ट्वा तं परमा
त्मानं कौशल्या विस्मयाकुला हर्षाश्रुपूर्णनयना नत्वा प्रांजलिरब्रवीत १९॥

तत्र कौशल्यायै अनुग्रहाय प्रथमं येन रूपेण प्रादुर्भूतस्तद्रूपमाह नीलोत्पलेति १६।१७ अनुग्र
हाख्येति भक्तानुग्रहाख्यो यो हृदयस्थ इंदुस्तस्य सूचिका स्मितरूपा चंद्रिका यस्य सः स्मितं च
षड्विकसितैर्गंडैः कटाक्षैः सोत्प्रेक्षितैः आलक्षितद्विजं धीरमतमानां स्मितं भवेदिति लक्षि

श्री॰
अ॰ रा॰
बा॰ टी॰
२४

परमात्माशुद्धबुद्धस्वभावः अच्युतः स्वस्वरूपात्कदापि न च्युतः शाश्वतं शिवमच्युतमिति श्रुतेः अनंतः अनंतगुणाः नित्यत्वादंतरहितः इति वा पूर्णः देशकालापरिच्छेद्यः पुरुषस्य उत्तमः सर्वाधिष्ठानत्वात् १ वाचां बुद्ध्यादीनामिंद्रियाणामगोचरं वदंति यतो वाचो निवर्तंते अप्राप्य मनसा सह इत्याद्याः श्रुतयः वागादिसर्वेंद्रियव्यावर्तनतात्तेषां विषयः नहि चक्षुरादिप्रकाशकादीपो घटादिविषयो भवति अत एव त्वामतींद्रियं वेदवादिनो वेदंतो वदंति तेन त्वां सत्तामात्रं सर्वत्र स्वेन रूपेण स्थितं सदिति व्यवहारोपपादकं सर्वाः प्रजाः सदायतना इति श्रुतेः ज्ञानैकविग्रहं।

कौशल्योवाच देवदेव नमस्तेस्तु शंखचक्रगदाधर परमात्माच्युतोनंतः पूर्णस्त्वं पुरुषोत्तम १ वदंत्यगोचरं वाचां बुद्ध्यादीनामतींद्रियं त्वां वेदवादिनः सत्तामात्रं ज्ञानैकविग्रहं २ त्वमेव मायया विश्वं सृजस्यवसि हंसि च सत्वादिगुणसंयुक्तस्तुर्य एवामलः

सत्यं ज्ञानमिति श्रुतेः वदंति ३ त्वमिति त्वमेव मायया सत्वादिगुणसंयुक्तः ततः गुणा ब्रह्मविष्णुरुद्रात्मकः सन् सृष्ट्यादिकरोषि तत्र रजःप्रधानो ब्रह्मा सत्वप्रधानो विष्णुः तमःप्रधानो रुद्रः विष्णोर्हिंस्यादि हंतृत्वमपि पालनार्थमेव उक्तमिति ग्रहं विनाशिष्टपालनायोगात् यस्मात्त्वं तत्त्व निर्गुण एव त्वमित्याह तुर्य एवेति ततः गुणासंयुक्तो जाग्रत्स्वप्नसुषुप्त्यवस्थाचतुर्थ इत्यर्थः यद्वा जाग्रत्स्वप्नसुषुप्तावस्थात्रयविश्वतैजसप्राज्ञेभ्यस्तुर्य इत्यर्थः नवहि प्रज्ञं नांतः प्रज्ञं नोभयतः प्रज्ञमिति श्रुतेः इयं हि चेष्टा जाग्रत्स्वप्नसुषुप्तावस्थानिषेधपरा श्रुतिः एव सदामलः मायागुणास्पृ

यमलत्वं सूचितं निर्विकारत्वमेव स्फुटयति करोषीवेति मायागतकृतिगत्यादिभिस्त
त्वानिव भासि वस्तुतो विकारहीनत्वान्न कर्तेत्यादि अज्ञैर्वत्सर्वं कुर्वन्निर्लिप्तस्त्वमिति तथा
वतः मायया सर्वशक्तित्वादजः सब्रह्मथा मनत इत्यभिः प्रज्ञाः २३ निर्विकारत्वहेतुं श्रु
तिदर्शितं तदुत्याह अप्राण इति दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः अप्राणो ह्य
मनाः शुभ्रो ह्यक्षरात्परतः पर इति प्राणाद्युपाधिरहितः अत एव कृतत्वाद्यादिरहित इति

करोषीव न कर्ता त्वं गच्छसीव न गच्छसि शृणोषि न शृणोषीव पश्यसीव न प
श्यसि २३ अप्राणो ह्यमनाः शुभ्र इत्यादि श्रुतिरब्रवीत् समः सर्वेषु भूतेषु ति
ष्ठन्नपि न लक्ष्यसे २४ अज्ञानध्वान्तचित्तानां व्यक्त एव सुमेधसां जडवेन दृश्य
ते ब्रह्मांशः परमाणवः २५ त्वमस्मादेव संभूत इति लोकान् विदर्शयसे भक्तोल्ल
पार्थं रूपते तत्त्वं द्रष्टुमेव वरहन्नम २६

भावः अप्राणमनयातत्तः परतः परः तद्गु
णास्पृष्टः सर्वतः परतस्त्वकृत इति श्रुतेरर्थः सर्वभूतेषु समः सन्नित्यादि प्रतीतेः स
र्वज्ञात्मकत्वात् अतः सर्वत्र तिष्ठन्नपि २४ अज्ञानध्वान्तचित्तानां अज्ञानरूपान्धकारव
द्वितेः मोक्षेष्वी नैर्मल्यात्सेव्यमेधसां तत्त्वतानां व्यक्त एव दृश्यसे तत्त्वयायाज्ञात्वा
त्मदर्शिभिरिति श्रुतेः यस्य तव जडदेहस्तोत्रः परमाणवाइव दृश्यते २५ सर्वमस्मादेव
संभूतमिति लोकान्समहात्म्यं विदर्शयसि पतत्सर्वं भक्तिपारवश्यादिग्राह भक्तो।

श्री॰
अ॰ रा॰
बा॰ टी॰
२५

यद्यपि ते मायया पत्यादिषु भ्रमयामि विषयोक्तेच्छावती संसारभ्रमादेश्रमामितया ख्याप्यते
पादपादमूलमागतास्तानविष्णोस्त्विति विमुच्ये इतिशेषः २७ एतत्स्वरूपं शंखचक्रगदाधरं त्वविशेषा
ष्टं रूपं प्रासंयागांतरमाह आवृणोत्विति २८ उपसंहारं हृत त्वलौकिकमिति सर्वलोकैर्दृ
ष्टमलौकिकं तेजोमयत्वादित्यर्थः २९ ननु त्वा तावर्णार्थमेवं रूपं परिग्रह इति चेत् तत्राह।

संसारसागरे मग्ना पतिपुत्रधनादिषु भ्रमामि मायया तेऽद्य पादमूलमुपायता
२७ देवरूपमेतत्ते सदा तिष्ठतु मानसे आवृणोतु न मां माया तव विश्वविमोहि
नी २८ उपसंहर विश्वात्मन्नेतद्रूपमलौकिकं दर्शयस्व महानंदं बालभावं सुको
मलं २९ ललिताललितानालापैस्तरिष्याम्युत्कटं तमः श्रीभगवानुवाच यद्य
दिष्टं तवास्त्यंब तत्तद्भवतु नान्यथा ३० अहं तु ब्रह्मणा पूर्वं भूमेर्भारापनुत्तये
प्रार्थितो रावणं हंतुं मानुषत्वमुपागतः ३१ त्वया दशरथेनाहं तपसाराधितः
पुरा मत्पुत्रत्वाभिकांक्षिण्या तथा कृतमनिंदिते ३२ ॥

ललितेति तमः अज्ञानमूलं संसारं ३० त्वदिष्टरूपभवने हेतुमाह अहं त्विति मानु
षत्वमुपागतः मानुषत्वं प्राप्तः कृतः इति ३१ तर्हि प्रथममपत्यं किं तथा रूपेण कृतमत आ
ह त्वयेति अहं पुत्रो यस्यास्तां भावो मत्पुत्रत्वं अत तत्त्वकांक्षिण्या तथा कृतमित्यर्थः ३२ २५

प्राक्तनतपसः फलभूतमेतद्रूपं त्वया दृष्टं ततस्त्वद्दर्शनमात्रेण कृतार्थोऽस्मीत्याह मदिति,
एवंरूपस्य मम दर्शनमस्मै स्वल्पोऽहीनैर्दुर्लभं विमोक्षाय कल्पते चित्तशुद्धिद्वारा तत्त्वमस्या
दिवाक्यजज्ञानसंपादकत्वेनेति भावः ३३ भक्तानुग्रहार्थं तत ऐश्वर्यमायिकं भगवतो

रूपमेतत्त्वया दृष्टं प्राक्तनं तपसः फलं तद्दर्शनं विमोक्षाय कल्पते स्वल्पदुर्लभं ३३
संवादमावयोर्यस्तु पठेद्वा शृणुयादपि स याति मम सारूप्यं मरणे मत्स्मृतिं लभेत् ३४
इत्युक्त्वा मातरं रामो बालो भूत्वा रुरोद ह बालत्वेऽपीन्द्रनीलाभो विशालाक्षोऽतिसुंद
रः ३५ बालारुणप्रतीकाशो लालिताखिललोकपः अथ राजा दशरथः श्रुत्वा पु
त्रोद्भवोत्सवं आनन्दार्णवमग्नोऽसावाययौ गुरुणा सह ३६ रामं राजीवपत्राक्षं
दृष्ट्वा हर्षाश्रुसंप्लुतः गुरुणा जातकर्माणि कर्तव्यानि चकार सः ३७ कैकेयी
चाथ भरतमसूत कमलेक्षणं सुमित्रायां यमौ जातौ पूर्णेन्दुसदृशाननौ ३८
तदा ग्रामसहस्राणि ब्राह्मणेभ्यो मुदा ददौ सुवर्णानि च रत्नानि वासांसि सुर

रूपमाह बालत्वेऽपीति ३५ लालितास्तोषिता अखिललोकपा इन्द्रादयो येन सः पु
त्रोद्भवः पुत्रोत्पत्तिस्तद्रूपमुत्सवं ३६ राजीवं कमलं गुरुणेति करणे तृतीया जात
कर्माणि बहुवचनेन नामकरणपर्यन्तं कर्तव्यषष्ठीपूजादिसंग्रहः ३७ ३८ सुरभीर्गाः ३८

श्री
अ रा
बा टी
२९

अथ नामकरणे नाम्नामन्वर्थत्वं दर्शयति यस्मिन्निति विघ्नयानमक्तानेन अक्षतान् मोघेन
न्निमित्ते यस्मिन्योगिनो रमन्ते इत्येकः योगांतः समाह रमणात् भक्तानां विग्रहसौंदर्येण रमणा
द्राम इत्यपि योगा इति शेषः रमणो रामः भावे घञ् तत्करोतीति राम इति तत्करोतीति णिच् रमय
तीति रामः गुणाजितादि तथा च भक्तान् रमयतीति फलितोर्थः ४० ४० पायसांशानुसा
रतः कौशल्यापायसांशाबालत्वेण रामानुचरः कैकेयीपायसांशान्यज्यस्थो भरतः

यस्मिन्रमंते मुनयो विद्ययाज्ञानविप्लवे तं गुरुः प्राह रामेति रमणाद्राम इत्यपि [illegible]
भरणाद्भरतो नाम लक्ष्मणं लक्षणान्वितं शत्रुघ्नं शत्रुहंतारमेवं गुरुरभाषत [illegible] ल
क्ष्मणो रामचंद्रेण शत्रुघ्नो भरतेन च द्वंद्वीभूय चरंतौ तौ पायसांशानुसारतः [illegible]
रामस्तु लक्ष्मणेनाथ विचरन्बाललीलया रमयामास पितरौ चेष्टितैर्मुग्धभाषि [illegible]
तैः भाले स्वर्णमयाश्वत्थपर्णमुक्ताफलप्रभं कंठे रत्नमणिव्रातमध्यद्वीपिनखो [illegible] [illegible]

न्नु बिभ्रदित्यर्थः ४३ ४३ स्वर्णमयाश्वत्थपर्णस्य प्रांते संयुक्तानि यानि मुक्ताफलानि तैः प्रभं
शोभा यस्य तत् रत्नमणीनां व्रातः समूहस्तस्य मध्ये वर्तमानं यत् द्वीपिनखं व्याघ्रनखं तेना
चितं मंडितं यत्काले बालकानां विघ्नशांत्यर्थं महिषादीनां भूषणेषु त्यक्त्वा दर्शनेन परीक्षको
चिरंजीवितमिति तत्र भूषणोक्त्या ग्रंथाकारः चित्रनिषेधं तत्र समयोक्त्या व्याघ्रनखं याचयति प्र। [illegible] २९

स्वर्णैः संपन्नानि च हृतानि रत्नानि यस्मिन् तत् अर्त्तेन हृदन्तस्य सदाल्लकमथ घक फलेन वा का
ञ्चनभूषणाय यस्य रत्नानि तत्पालाङ्कमिति पाठान्तरे अर्थः तल्ल्यः सिंजानाः शब्दयुक्ता ये मणयस्त
द्युक्तैः मञ्जीरकटिसूत्राङ्गदैर्हृत्तं मञ्जीरं पादभूषणं अङ्गदो बाहुभूषणं ४५ स्मितं स्मितयुक्तं
वक्त्रं यस्य स चासावल्पदशनश्चेति तं तर्णकानुगोवत्सानन्वतस्थबालगत्यावेवन्तं ॥ ४६ ॥ द

र्णयोः स्वर्णसंपन्नरत्नाजन्मदाल्लकं सिंजानमणिमञ्जीरकटिसूत्राङ्गदैर्युतं
स्मितवक्त्राल्पदशनं सिंहनीमणिप्रभे अङ्गणेरिङ्गमाणं तं तर्णकाननु सर्वतः ॥ ४६ ॥
दृष्ट्वा दशरथो राजा कौशल्यासमदे तदा भोक्ष्यमाणो दशरथो राम मेहीति चा
सकृत् ॥ ४७ ॥ आहूयेत्यति हार्देन प्रेमणानायाति लीलया आनयेति च कौशल्याम
ह सा सस्मिता सुतं ॥ ४८ ॥ धावत्यपि न शक्नोति स्प्रष्टुं योगिमनोगति प्रहसन्स्वय
मायाति कर्दमाङ्कितपाणिना ॥ ४९ ॥ किंचिद्गृहीत्वा कवलं पुनरेव पलायते कौश
ल्याजननीनस्य मासि मासि प्रकुर्वती ॥ ५० ॥ वायनानि विचित्राणि समलंकृत्य रा
घवं आप्लूयान्मोदकान्कृत्वा कर्णशष्कुलिकास्तथा कर्णवेधांश्च विविधान्वर्षवृद्धौ

श्री ह्येति लाह्वयीत तत्प्रीडास्मित्यर्थः ॥ ४७ ॥ प्रेमणा आहूतोपीति शेषः लीलया क्रीडासक्त्या
नो याती त्यर्थः ॥ ४८ ॥ योगिमनोगति योगिमनोविषयं कर्दमाङ्कितपाणिना उपलक्षित इति
शेषः ॥ ४९ ॥ ५० ॥ पुत्रादिकल्याणार्थं हिपम समथवाभ्यादीपमानमभ्यविशेषा वायनेन वायना
नि प्रकुर्वती वभूवेति शेषः कर्णशष्कुलाः कर्णस्यालंकारविशेषाः वर्षवृद्धिवर्षोत्सवदिनक

श्री रा वा टी २३

रुरुहस्तत्यागकारणेनचापलमेवदर्शयति एकदेति मातरमंतिके मातुः समीपे इत्यर्थः द्वितीया
छांदसी ५२ अहनत अहनदित्यर्थः गणकार्यस्यानित्यत्वात्शपोलक ५३ गव्यंदधिइत्यर्थं ५४

रुरुदस्तं तयात्यक्तं तस्यचापल्यकारणात् एकदा रघुनाथोसौ गतो मातरमंति
के ५२ भोजनं देहि मे मातर्न श्रुतं कार्यसक्तया ततः क्रोधेनभांडानि लकुटेनाहन
त्तदा ५३ शाकस्यपात्यामासगव्यं चनवनीतकं लक्ष्मणाय ददौ रामो भरताय यथा
क्रमं ५४ शत्रुघ्नायददौ पश्चाद्दधि दुग्धं तथैव च रुदंतेकाथितं मात्रेहास्यं चक्रु
र्मुधाविना ५५ आगतौ तौ विलोक्याथ ततः सर्वैः ------ कौसल्याधावमानापिस्ख
लंती पदे पदे ५६ रघुनाथं करेधृत्वा किंचिन्नोवाच भामिनी बालभावं समाश्रि
त्य मंदं मंदं रुरोदह ५७ ते सर्वे लालितामात्रा गाढमालिंग्य यत्नतः एवमानंद
संदोहं जगदानंदकारकः ५८ मायाबालवपुर्धृत्वा रमयामास दंपती अथ का
लेन ते सर्वे कौमारं प्रतिपेदिरे ५९ उपनीता वसिष्ठेन सर्वविद्याविशारदाः ध
नुर्वेदे च निरताः सर्वशास्त्रार्थवेदिनः ६० बभूवुर्जगतां नाथा लीलयानरूपि
णः लक्ष्मणोस्य सदा रामं मनुगच्छति सादरं ६१

रुदंतस्य प्रकारः मात्रे
कौशल्यायै ५५ ५६ ५७ ५८ दंपती कौशल्यादशरथौ कौमारं पंचवर्षाधिकवं

नकरोतीत्यत्रहेतुरविकारीपरिणामहीनइति अविकारीत्यस्यैवव्याख्यानंपरिणामही

भृत्यसेवकभावेनशत्रुघ्नोभरतंतथा रामस्यामधरोनित्यंलक्ष्मणबाणान्वितः
प्रभुः ६२ अश्वारूढोवनंयातिमृगयायैसलक्ष्मणः हत्वादुष्टमृगान्सर्वा
न्पित्रेसर्वंन्यवेदयत् ६३ प्रातरुत्थायसुस्नातःपितरावभिवाद्यच पौर
कार्याणिसर्वाणिकरोतिविनयान्वितः ६४ बंधुभिसहितोनित्यंभक्त्वामुनि
भिरन्वहं धर्मशास्त्ररहस्यानिशृणोतिव्याकरोतिच ६५ एवंपरात्माम
नुजावतारोमनुष्यलोकाननुसृत्यसर्वं चक्रेविकारीपरिणामहीनोविचा
र्यमाणोनकरोतिकिंचित् ६६ इतिश्रीअध्यात्मरामायणेउमामहे
श्वरसंवादेबालकांडेतृतीयःसर्गः ३॥

नइति ६६ इतिश्रीरामवर्मणःकृतौरामायणसेतौबालकांडेतृतीयोध्यायः ३ ॥ ॥

श्री· अ·रा· बा·टी· २८

प्रश्नपूर्वकं तेन विश्वामित्रागमनमाह कदाचिदिति रामं स्वमायया जातं ज्ञात्वा तद्दर्शनार्थं
मागमदित्यन्वयः १ अविरेणाशीघ्रदर्शनाख्यवहितोत्तरकाले प्रत्युत्थाय विसिष्ठेन समा
गमसहितो यथोक्तेति यावत् पूजनेनाम्भिः कर्म २ नम्रशरीरत्वेन नम्रधीत्वानुमानं च

कदाचित्कौशिकोभ्यागादयोध्यां ज्वलनप्रभः द्रष्टुं रामं परात्मानं जातं ज्ञात्वा
स्वमायया १ दृष्ट्वा दशरथो राजा प्रत्युत्थायाविरेण तु वसिष्ठेन समागम्य
पूजयित्वा यथाविधि २ अभिवाद्य मुनिं राजा प्रांजलिर्भक्तिनम्रधीः कृता
र्थोस्मि मुनीन्द्राहं त्वदागमनकारणात् ३ त्वद्विधा यद्गृहे यान्ति तत्रैवायां
न्ति संपदः यदर्थमागतोसि त्वं ब्रूहि सत्यं करोमि तत् ४ विश्वामित्रोपि तं प्रीतः
प्रत्युवाच महामतिः अहं पर्वणि संप्राप्ते दृष्ट्वा यष्टुं सुरान् पितॄन् ५ ॥

दागमनरूपात्कारणादित्यर्थः ३ तत्रैव तद्गृह एव भगवदायागमनस्य सकल
सकलसंपत्प्रतिबंधकदुरितनाशकत्वादिति भावः तत्करोमीति सत्यं ब्रवीमी
ति शेषः ४ दृष्ट्वा पर्वे प्राप्ते स्नात्वा सुरादीन्यष्टुं ५ ॥ २८

७मै

यदारभेतदेत्यन्वयः ६ नवक्ष्येयः तदैव तव श्रेयस्तत्पर्यः ७ यस्य हेतोस्त्वया विश्वामित्रवचोनं
नवमित्यादि ८ ९ इतः सत्सन्निधानात् १० प्रत्याख्यातो यदीति भवेष्यतीति शेषः श्रेयो
नामविष्णोरावतरणाभावरूपं अमुत्वं मुनिप्रत्याख्यानजपापं तन्मूलमपायं च ॥ सू
यदारभेतदादैत्याविघ्नं कुर्वंतितित्यर्थः मारीचस्य सुबाहोश्च यदेचानुचरास्त
योः ९ अतस्तयोर्वधार्थाय त्वं प्रेषितराम प्रसहत्वरे लक्ष्मणेन सह भ्रात्रा तव श्रेयो
भविष्यति ७ वसिष्ठेन सह रामं च प्रदीयतां यदि रोचते यस्य हेतोर्गृहमेकान्ते राजा
चिन्तापरायणः ८ किं करोति रामेत्यन्तके तोत्सहते मनः बहुवर्षसहस्रो
ते कष्टेनोत्पादितास्सुताः ९ चत्वारोऽमरतुल्यास्तेषां रामोऽतिवल्लभः राम
स्त्वितो गच्छति चेन्न जीवामि कथंचन १० प्रत्याख्यातो मुनिश्चायं दिशापं ददा
त्यसंशयः कथं श्रेयो भवेन्मह्यं मम त्वं चापि निरूपय ॥ वसिष्ठ उवाच शृ
णु राजन्महद्देव गुह्यं गोपनीयं प्रयत्नतः रामो न मानुषो जातः परमात्मा सना
तनः १२ भूमेर्भारावताराय ब्रह्मणा प्रार्थितः पुरा स एव जातो भवने कौशल्यायां
तवानघ १३ त्वं तु प्रजापतिः पूर्वं कश्यपो ब्रह्मणः सुतः कौशल्या चादितिर्देवमा
ताविवतिरामः पूर्वं मुपिमान्बधप्वेदानीं पुनरपिमानुषो जातः इति न किंतु सनातनो निर्वि
कारत्वात्सदैकरूपायः परमात्मा स एव ब्रह्मणा पुरा प्रार्थितः सन् तव भवने जात इत्य
न्वयः १२ १३ भगवदवतारयोग्यतामाह त्वं त्विति तयोर्नेकृतवंतो १४ ॥

श्री अ. रा. बा. टी. २९

प्र ग्राम्यविषयौ ग्राम्यविषयानासक्तौ तेन ब्रह्मचर्यं स्थितं १५ १६ शोभो लक्ष्मणशोभांशो
लक्ष्मण इत्यर्थः १७ शंखचक्रगदाभृतः संबोधितो वक्रगा हृदा विलिशोभः तौ भरतशत्रुघ्नौ जा
ताविन्यर्थः १८ १९ २० प्रक्षिप्तो वः स्थितः २१ मध्ये वद्धायेति प्रजापत्ये स्वाहिका

अग्राम्यविषयौ विलसज्जाप्यानैकलत्परौ तदा प्रसन्नो भगवान् वरदो भक्तव
त्सलः १५ वृणीष्व वरमित्युक्ते त्वं मे पुत्रो भवामल इति तथा याचितो भगवान् भूत
भावनः १६ तथेत्युक्त्वा ययौ पुत्रस्तज्जातो रामः स एव हि शेषस्तु लक्ष्मणो जातो राम
मेवान्वपद्यत १७ जातौ भरतशत्रुघ्नौ शंखचक्रे गदाभृतः योगमायापि सीतेति
जाता जनकनंदिनी १८ विश्वामित्रोपि रामाय तां योजयितुमागतः एतद्गुह्य
तमं राजन्न वक्तव्यं कदाचन १९ अतः प्रीतेन मनसा पूजयित्वाथ कौशिकं प्रे
षयस्व रामेण सार्धं सलक्ष्मणं २० वसिष्ठेनैवमुक्तस्तु राजा दशरथस्तदा
कृतकृत्यमिवात्मानं मेने प्रमुदितान्तरः २१ आहूय राम रामेति लक्ष्मणेति च सादरं
आलिंग्य मूर्ध्न्यवघ्राय कौशिकाय समर्पयत् २२ ततोतिहृष्टो भगवान् विश्वामित्रः

रेणावतिशासिसहस्वागुणासोऽजीवधारदः पालसितिवद्याणमंत्रलिंगेन तस्य पुत्राय याश्र्व
द्धिकरणाततत्करणमितिबोध्यं २२ आगतौ स्वसमीपं प्रामौ रामलक्ष्मणौ २३ ॥ ॥ २९

गृहीत्वा याययौ जगामेत्यर्थः २४ बलामिति बलाविद्या शरीरसामर्थ्यसंपादनद्वारेणाधिका ।
बलेषु हितत्वेन दृश्यते इति संज्ञान्तरं । अतिबला तत्संकल्पमात्रादिष्टजनिकेत्याहुः २५ २६ अविचा
रयन् स्त्रियामत्र वध्यत्वमविचारयित्वेत्यर्थः २७ सगुणा आहृदेशं तेन धनुषाहेन धनुषाहेन २८ असह

बालकाण्डे सर्गः

गृहीत्वा याययौ तूर्णी विश्वामित्र धनुर्धरौ ययौ । किं विदेशमतिक्रम्य राममाहूय भक्तितः ॥ २४
ददौ बलां चातिबलां विद्ये देवविनिर्मिते । ययोर्ग्रहणमात्रेण क्षुत्क्षामादि न जायते
ततस्तौ च ययतुर्गाने ताटकावनमागमन् । विश्वामित्रस्तदा प्राह रामं सत्यपराक्रमं ॥ २६
अत्रास्ति ताटका नाम राक्षसी कामरूपिणी । बाधते लोकमखिलं जहि तामविचारय
न् २७ तथेति धनुरादाय सगुणं रघुनंदनः । टंकारमकरोत्तेन शब्देनापूरयद्दिशः २८
तच्छ्रुत्वा सहमाना सा ताटका घोररूपिणी । क्रोधसंमूर्छिता राममभिदुद्राव मेघ
वत् २९ तामेकेन शरेणाशु ताडयामास वक्षसि । पपात विपिने घोरा वमन्ती रुधिरं
बहु ३० ततोतिसुन्दरी यक्षी सर्वाभरणभूषिता । शापात्विमुक्ता चलिता प्राप्ता नाकं राम
प्रसादतः ३१ नत्वा रामं परिक्रम्य गता रामाज्ञया दिवं ३२ ततोतिहृष्टः परिरभ्य राम
मूर्द्ध्न्यवघ्राय विचिन्त्य किंचित् । सर्वास्त्रजालं सरहस्यमंत्रं प्रीत्याभिरामाय ददौ महर्षिः

मानेति छेदः क्रोधसंमूर्छिता अतिक्रुद्धा २९ ३२ ततस्ताटकावधकर्मवशादतितुष्टो विश्वामित्रः
किंचिद्विचिंत्य रामस्य गुरुत्वेन स्वस्य तत्काले वक्तिपदस्यासियोग्यता लाभं विचार्येत्यर्थः अभिरा
माय रामाय सरहस्यमंत्रमस्त्रजालं ददावित्यन्वयः ३३ इति बालकांडे टीकायां चतुर्थः सर्गः ४

श्री॰
अ॰ रा॰
वा॰ टी॰
३॰

तत्र कामाश्रमे ताटकावधस्थानभूते कामाश्रमाख्ये कामस्य रुद्रेणानंगता संपादके।
वने ताटकाभयाद्देवमुनिसंकुले १ सिद्धाश्रमे विश्वामित्रवासस्थाने वामनाश्रमा

तत्र कामाश्रमे रम्ये कानने मुनिसंकुले उषित्वा रजनीमेकां प्रभाते
प्रस्थिताः शनैः १ सिद्धाश्रमं गताः सर्वे सिद्धचारणसेवितं विश्वामि
त्रसमादिष्टा मुनयस्तन्निवासिनः २ पूजां च महतीं चक्रू रामलक्ष्मण।
योर्द्रुतं श्रीरामः कौशिकं प्राह मुनीदीक्षां प्रविश्यतां ३ दर्शयस्व
महाभाग कृतलोगवत्साधमौ तथेत्युक्त्वा मुनिर्यज्ञं कुमारे
भ्यां मुनिभिः सह ४ मध्याह्ने ददृशाते तौ राक्षसौ कामरू
पिणौ मारीचश्च सुबाहुश्च वव
र्षतू रुधिरास्थिनी ५ ॥ ॥

त्वं तन्निवासिनः श्रीसिद्धाश्रमवासिनः २ ३ कुतश्चागच्छतः कस्मिन्काले इति शे
षः ४ ददृशाते दृष्टौ ५ ॥ ३॰

द्वौ बाणौ संदधे ईषत्कालान्तरे पितुराप दिव ६ जनयौ नत्समीपे संधाणो योजनशतं तिमिङ्गः।

रामोपि धनुरादाय यौ बाणौ संदधे सुधीः आकर्णपूर्णं तं समाकृष्य विससर्ज तयोः पृथ-
क् ६ तयोरेकस्तु मारीचं भ्रामयन् शतयोजनं पातयामास जलधौ तदद्भुतमिवाभ-
वत् ७ द्वितीयोग्निमयो बाणः सुबाहुमजयत्क्षणात् अपरे लक्ष्मणेनाशु हतास्तद-
नुयायिनः ८ पूज्यमानो देवाकिस्तदेवाराघवं सहलक्ष्मणं देवदुन्दुभयो नेदुस्तुष्टुवुः
सिद्धचारणाः ९ विश्वामित्रस्तु संपूज्य पूजार्हं रघुनन्दनं अंके निवेश्य चालिंग्य
भक्त्या वाष्पाकुलेक्षणः १० भोजयित्वा सह भ्रात्रा रामं पक्वफलादिभिः पुराणवा-
कैर्मुनिभिर्निनाय दिवसत्रयं ११ चतुर्थेहनि संप्राप्ते कौशिको राममब्रवीत्।
राम राम महाभाग द्रष्टुं गच्छामहे वयं विदेहराजनगरे जनकस्य महात्मनः
तत्र माहेश्वरं चापमस्ति न्यस्तं पिनाकिना १२ ॥

ताराद्योथसीति वाल्मीकिवचनेः ७ अग्निमयमाग्नेयास्त्रं मुक्तं प्रजयत् हतवान् इति वा-
त् ८ ९ १० ११ १२ न्यस्तं तन्नगराधिपराजिकस्मिंश्चान्यासमीपे न स्थापितं १३ ॥ ॥ ॥

श्री॰ प्र॰ रा॰ वा॰ टी॰ ३१

महासत्त्वमतिदृष्टं तां गामसमीपगामिति गौतमाश्रमविशेषणं ४ यत्राहल्या तपस्यास्थिते त्य
क्ष्यः ५ नानाजंतुभिः नानाप्रकारैः स्वद्गमादिभिर्विहीनो गौतमशापादितिभावः ६ ७ ८ त
पसा हरिमाराधयन्स्थित इति शेषः ९ १० भवान्तीत्वा संकृतवान् तामहल्यां दर्षयित्वे

इत्यसिवं महात्मनं सृजोसे जनकेन च इत्युक्त्वा कृतिभिस्ताभ्यां ययौ तां गामसमीपगां ४
गौतमस्याश्रमं पुण्यं यत्राहल्या स्थिता तपः दिव्यपुष्पफलोपेतं पादपैः परिवोहितं ५
मृगपक्षिगणैर्हीनं नानाजंतुविवर्जितं दृष्ट्वोवाच मुनिं श्रीमान् रामो राजीवलोच
नः ६ कस्यैतदाश्रमपदं भाति भास्वच्छुभं महत् पत्रपुष्पफलैर्युक्तं जंतुभिः परि
वर्जितं ७ आह्लादयति मे चेतो भगवान् ब्रूहि तत्त्वतः ८ विश्वामित्र उवाच शृणु =
राम पुरा ह्यत्र गौतमो लोकविश्रुतः सर्वधर्मभृतां श्रेष्ठस्तपसाराधयन्हरिं ९ २
तस्मै ब्रह्मा ददौ कन्यामहल्यां लोकसुंदरीं ब्रह्मचर्येण संतुष्टः शुश्रूषणपराया १८
णां १० तयासार्द्धमिहासीद्गौतमस्तपतो वरः शक्रस्तां धर्षयितुं मेने तं प्रेप्सवन् ह
ह्वं ११ कदाचिन्मुनिवेषेण निर्गते गौतमे गृहात् धर्षयित्वाथ निरगान्मुनिर्वेषेण मुनिर ॥

उपभोक्तुमंतरमन्यमाश्रित्य हृदयं प्रेप्सुरासीदिति शेषः ११ गौतमे गृहान्निर्गते सति मुनिवे
षेण तद्गृहं प्रविश्य तामहल्यां धर्षयित्वोपभुज्य निरगात् मुनिरपि स्वगृहमगात् १२ ॥ ३१

स्वरूपेणास्यात्मनो गौतमस्य रूपेण दुष्टात्मन्मे हेतु मद्रूपधरत्वं २३ कामकिंकरं काम
परवशात्तयाज्ञयुक्तकर्मकरमित्यर्थः २४ २५ २६ शिलायामिति लीना भूत्वेति शेषः

दृष्ट्वायांतं स्वरूपेण मुनिः परमकोपनः पप्रच्छ कस्त्वं दुष्टात्मन्मम रूपध
रोधमः २३ सत्यं ब्रूहि न चेद्भस्म करिष्यामि न संशयः सोब्रवीद्देवराजोहं पाहि
मां कामकिंकरं २४ कृतं जुगुप्सितं कर्म मया कुत्सितचेतसा गौतमः क्रोधता।
म्राक्षः शशाप दिविजाधिपं २५ योनिलंपट दुष्टात्मन्सहस्रभगवान्भव शा।
प्त्वा तं देवराजानं प्रविश्य स्वाश्रमं द्रुतं २६ दृष्ट्वाहल्यां वेपमानां प्रांजलिं गौतमोब्र
वीत् दुष्टे त्वं तिष्ठ दुर्वृत्ते शिलायामाश्रमे मम २७ निराहारा दिवारात्रं तपः परममा
स्थिता आतपानिलवर्षादिसहिष्णुः परमेश्वरं २८ ध्यायंती राममेकाग्रमनसा
हृदि संस्थितं नानाजंतुविहीनोयमाश्रमो मे भविष्यति २९ एवं वर्षसहस्रेषु
ह्यनेकेषु गतेषु च रामो दाशरथिः श्रीमानागमिष्यति सानुजः ३० यदा त्वदा
श्रयशिलां पादाभ्यामाक्रमिष्यति तदैव धूतपापा त्वं रामं संपूज्य भक्तितः ३१ परि
क्रम्य नमस्कृत्य स्तुत्वा शापाद्विमोक्ष्यसे पूर्ववन्मम शुश्रूषां करिष्यसि यथासुखं ३२

२७ २८ २९ ३० हृदयस्थ स्वयमेव शापान्तमाह एवमिति त्वदाश्रयशिलां च त्वदाश्रयशिला ३१ ३२

श्री॰ अ॰ रा॰ बा॰ टी॰ ३२

तदादि तन्यभूतिश्च भेस्वाश्रमे अदृश्या आस्ते इति शेषः ३३ ३४ ३५ ३६ ३७ चतुर्भुजमिति स्वस्य भग
वदवतारत्वमत्यायनाय मेथे चतुर्भुजरूपं कौशल्यामिव दर्शयित्वा पुनर्द्विभुजरूपेणैव स्थि

इत्युक्त्वा गौतमः प्रागाद्धिमवंतं नगोत्तमः तदाप्रहल्या भूतानामदृश्या स्वाश्रमे शुभे ३३
तव पादरजस्पर्शकांक्षा ततैव नाशना अमेध्यापि रघुश्रेष्ठ तपो दुष्करमास्थिता ३४
पावयस्व मुनेर्भार्यामहल्यां ब्रह्मणः सुतां इत्युक्त्वा राघवं हस्ते गृहीत्वा मुनिपुंगवः ३५
दर्शयामास चाहल्यामुग्रेण तपसास्थितां रामः शिलापदा स्पृष्ट्वा तां चापश्यत्तपोधनां =
ननाम राघवोऽहल्यां रामोऽहमिति चाब्रवीत् ततो दृष्ट्वा रघुश्रेष्ठं पीतकौशेयवाससं ३६
चतुर्भुजं शंखचक्रगदापंकजधारिणं धनुर्बाणधरं रामं लक्ष्मणेन समन्वितं ३७
स्मितवक्त्रं पद्मनेत्रं श्रीवत्साङ्कितवक्षसं ३८ नीलमाणिक्यसंकाशं द्योतयंतं दिशो दि
शा दृष्ट्वा रामं रमानाथं हर्षविस्फारितेक्षणा ३९ गौतमस्य वचः स्मृत्वा ज्ञात्वा ना
रायणं परं संपूज्य विधिवद्रामम् अर्घ्यादिभिरनिंदिता ४० हर्षाश्रुजलनेत्रान्ता
दंडवत्प्रणिपत्य सा उत्थाय च पुनर्दृष्ट्वा रामं राजीवलोचनं ४१ पुलकितसर्वांगा

न इत्यादि स्थनुतिति ३८ ३९ ४० हर्षजन्यं यदश्रुरूपं जलं तद्युक्ते नेत्रान्ते यस्याः सा ४१ पुलकित अप्रसन्ना
प्रीत इत्युक्तत्वादिना स्मालशिव्यत्ययेन यापोलगाभावः उलयोरेकत्वस्मृतिना हल्लकारो वा॥ ३२

नेतव पादाब्जसंलग्नरजःकणात् तत्संबंधादहं कृतार्थास्मि मत्कथायास्मि अहो इत्याश्चा
र्यं अपरं स्वस्य कृतार्थत्वे हेतुमाह यत्ते पादपद्मपद्मजपाकवादिभिः तदलाभाद्दुःखितमानसैः पी
डितमानसैः सदा स्पृष्टुं विमृग्यते तदहं स्पृशामीति च कृतार्थास्मि ५१ अहो इति आश्चर्यं विचि
त्रं वास्तवस्वरूपानन्तगुणानवचेष्टितं यतः अपाणिपादो जवनो ग्रहीतेति श्रुतेर्वक्तन्तश्चरणा
दिवर्जितोपि मन्नसंस्पर्शः सर्वथामायिसन् आनंदमयः तत्वरूपोपि मनजगत् आत्मनि

इत्युवाच अहो कृतार्थास्मि जगन्निवास ते पादाब्जसंलग्नरजःकणादहं स्पृशा
मि यत्पद्मजपाकवादिभिर्विमृग्यते रंधितमानसैः सदा ५२ अहो विचित्रं तव राम
चेष्टितं मनुष्यभावेन विमोहयन् जगत् चलस्यजस्रं चरणादिवर्जितः संपू
र्णआनंदमयोतिमायिकः ५३ यत्पादपंकजपरागपवित्रगात्राभागीरथीभ
वविरंचिमुखान्पुनाति साक्षात्स एव मम दृग्विषयो यदास्ते किं वर्ण्यते मम पुरा
तनभागधेयं ५४

मनुष्यभुवनुप्यादनेन विमोहयन् मनुष्यभावेन चलस्य क्रियामात्रोपलक्षणामिदं विरोध
भासोत्र औपाधिकत्वेन तत्परिहारात् नन्वीदृशस्य मनुष्यभावः कथं तत्राह अतिमायि
कः इति सकलमायावृन्दाश्रयत्वं सकलजगद्रूपेणापरिणामनसमर्थो माहामायावानित्य
र्थः एवंचस्तुतमायिकत्वं वदंतव पादौ चलनादिकं वितरवदिति भावः ५३ यत्पादेति विस्पाः पा

दशमस्कंधे [illegible] ४४॥

श्री॰
म रां॰
बा टी॰
३२

रमणीयदेहिनमित्यर्थः ४५ यस्यपादो विश्वं पादोस्य विश्वा भूतानि तिष्ठन्ते तदेव पंकजं तस्य र
जः रज इव सारांशाः यथाक्रमलेशांशास्तेषां संपादकतया तं विरंचमानं रजः पवमानं एवं विश्वात्यसत्ता
भान्तसंपादकतया ब्रह्मैव सारांशा वा रजस्तत्कृतिभिर्विश्वरूपं ऋतिशिरोरूपाय नित्यरूपमनस्
तस्यतिभावः यत्रान्तामध्ये सावेनाभरामेतितस्यवसिकस्तादृद्वयप्रीतिमानभगवान् ऐश्वर्य
धर्मयशोलक्ष्मीज्ञानरागयवान् यस्मामेषां ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियज्ञानवैराग्य

मत्स्यो वा तारेस्मनुजाकृतिं हरिं समभिध्येयरमणीयदेहिनं धन्यर्धंवंपद्मविशाल
लोचनं भजामिति त्यं नपरात्मजिष्णु ४५ यस्मादपंकजरजःस्वभिर्विश्वरूपं यत्राभिपं
कजभवः कमलासनस्थ यत्रामरासरसिकोभगवान्मुरारिस्तंरामचंद्रमनिशंहृदि
भावयामि ४६ यस्यावतारचरितानि विरिंचलोके गायंति नारदसुखाभवपद्मा
जाद्याः आनंदजाश्रुपरिषिक्तकुचाग्रसीमा वागीश्वरी च तमहं शरणं प्रपद्ये ४७

योऽस्त्वैवर्षाणांभगामतत्कन्योक्तैः उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां
च स वाच्यो भगवानिति उक्तो वा ४६ विरिंचिलोके ब्रह्मलोके नारदसुखा ऋषयः भवपद्म
जाद्या देवाश्च यच्चरितं तस्य रणाजानंदाश्रुभिः सिक्तकुचाग्रे हृदुके तपासीमनीमानभा
गीच यथा वागीश्वरी सरस्वती च गायतीति विन्यतेनान्वयः ४७ ॥ ३२

सोऽयंरामः परात्मापरः सर्वजीवेभ्यः प्रकृतेश्च अधिक आत्मा पुरुषः परिशयनात्पुरुषः
पुराणः सर्वदाविद्यमानः स्वयं एष स्वयंज्योतिः स्वप्रकाशः अनंतो विनाशी आद्यः सर्व-
कारणं परानुग्रहे परेषां साटधाम्नानामनुग्रहे कर्तव्ये तयाबुद्धिस्य सतिपरमतं ददा-
त्वादिगुणो लोकविमोहिनी मायातनुं न विन्नरजनवत्याचभौतिकीं धत्ते स एव एषः राम

सोऽयंपरात्मापुरुषः पुराणएषस्वयंज्योति-
रनंत आद्यः मायातनुंलोकविमोहिनींयो
धत्तेपरानुग्रहएषरामः ४८ अयंहिविश्वो-
द्भवसंयमानामेकःस्वमायागुणाविंबितोयः
विरिंचिविष्ण्वीश्वरनामभेदान्धत्तेस्वतंत्रः
परिपूर्णआत्मा ४९ ॥

उपासकानां मे कार्यार्थं ब्रह्म- णो रूपकल्पनेति श्रुतेः ४८
अयंहीतिविश्वस्यजगतउद्भवउत्पत्तिः संयमोनाशस्ताभ्यांपालनं मध्ये पालनं तेषां
स्वतंत्रः कर्तेतिपाणिानुक्तेः एषएकएवपरिपूर्णोव्यापकआत्मा स्वमायागुणैः शुद्धरजः-
सत्वतमः प्रतिविंवितः प्रतिविंवितःसन् विरिंच्यादिनामभेदान् धत्ते रजोगुणोपहितं
चैतन्यः मेवब्रह्मा सत्वगुणोपहितं विष्णुः तमोगुणयुक्तं रुद्र इतिभावः ४९ ॥ ॥

श्री॰ भ॰ टी॰ वा दी॰ ३४

हेरामयत्नवांघ्रिपंकजं श्रियात्मियत्वात्प्रियावक्षसि धृतं लालितं चयेनैकेन जगत्त्रयमाक्रा
न्तं इदं विष्णुर्विचक्रमे त्रेधा निदधे पदमिति श्रुतेः यच्च तत्त्वाभिमानैर्मतिभिर्ध्येयं तद्विष्णोः पर
मं पदं सदा पश्यंति सूरय इति श्रुतेः तस्मै नमोऽस्त्वित्यर्थः ५ जगतामिति आदिभूतः कार
णत्वादिति भावः जगत्त्वं जगदन्तर्वादेन त्वं जगदन्तर्वादेन त्वं पदेयात् तस्मात्मना विधीय
ते सर्वं खल्विदं ब्रह्मेतिवत् तच्च जगतां मिथ्याभूतत्वेन ब्रह्मसमानाधिकरणयाप्रयपा

नमोऽस्तु हेरामतवांघ्रिपंकजं श्रियाधृतं वक्षसि लालितं प्रियात् आक्रांतमेकेन
जगत्त्रयं पुरा ध्येयं मुनीन्द्रैरभिमानवर्जितैः ५ जगतामादिभूतस्त्वं जगत्त्वं ज
गदाश्रयः सर्वभूतेष्वसंसक्त एको भाति भवान्परः ६ ॥

तावपि तस्य प्रधानत्वेन जगद्बाधफलकत्वान्न दोषः एवं जगदारोपाधिष्ठानं त्वमित्यर्थः
तदेवाह जगदाश्रय इति इमाः प्रजाः सदायतनाः सत्प्रतिष्ठा इति श्रुतेः वास्तव आश्रया
श्रयिभावो नास्त्येवेत्याह सर्वभूतेष्वसंसक्त इति एवं चाश्रुत्युक्तेन तदधिष्ठानत्वमध्या
रोपितमेवेति भावः अत एव भवानेकोऽद्वितीयो भाति प्रकाशते ६ ॥ ३४

ओंकारवाच्यस्त्वं तस्य वाचकः प्रणव इति पातंजलसूत्रात् प्रवतीत्योमिति निरुपाधिक-
वस्तु कवचगुणेन सगुणवाच्यः यद्वाग्रस्वडेस्वमचग्रोमिति ब्रह्मविष्णुशिवात्मत्वेन सगुणवाच्य-
त्वं यणा नादो बिन्दुना च शुद्धब्रह्मस्वरूप तत एव तत्र निर्बन्धं पदद्वयेपि यद्वापि सोऽहमि-
ति शाहे सकारान्तोलोपयित्वा ततः परसंधिं कुर्यात् पूर्वरूपं ततो सो प्रणवो भवेदिति रीत्या
प्रणवसाधनं तदापि ग्रहमन्त्रवादेन तत्ताविशिष्टा तयोरभेदप्रतिपादनात् सगुण एव

ओंकारवाच्यस्त्वं नामवाचामविषयः प्रमान् वा
च्यवाचकभेदेन भवानेव जगन्मयः ५२ ॥

तदर्थः यद्वा सकारहकारलोपेन तत्त्वाहं तयोस्त्यागात् कूटस्थमेव ब्रह्म तदर्थः अत्र शाक्तिय-
हार्दिप्रकाशान्यत्र विस्तरेण प्रपंचितः तर्हि किं सगुण एवाहं नेत्याह वाचामविषयइतिनि-
हं प्र धर्मकत्वाच्छब्दप्रवृत्त्यसंभवेन स्वतस्तत्त्वं वाधाविषय इत्यर्थः नन्वेवं तस्य वाचकः प्रणव इ-
ति पातंजलसूत्रासंगतिरत्राह वाच्येति वाच्यवाचकभेदेन तत्कल्पनया भवानेव माय-
याज्जगन्मयइति काल्पितभेदेकल्पितगुणाश्रतच वाच्यत्वं शुद्धेत्वापारमर्षसूत्रोपपत्तिभावः ५२

श्री॰ अ॰ रा॰ टी॰ ३५

उक्तं जगन्मयत्वं मायिकमित्याह कार्येत्यादिना कार्यं महत्तत्त्वादि कारणं मायाख्या मूलप्रकृतिः
कर्तृत्वं तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं फलं स्वर्गनरकादि साधनं कर्मादि
वेदादि एतद्भेदेन एकापि त्वं बहुरूपया मायया उक्तं भेदैर्युक्त इव भासि उक्तं च विष्णुपुराणे
स एव मूलप्रकृतिर्व्यक्तरूपी जगच्च यः तस्मिन्नेव लयं सर्वं याति तत्र च तिष्ठति कर्ता क्रियाणां
स च इज्यते क्रतुः स एव तत्कर्मफलं च तस्य युगादि यत्साधनमप्यशेषं नो हरेर्न किंचिद्व्य

कार्यकारणकर्तृत्वफलसाधनभेदतः । एको विभासि राम त्वं मायया बहुरूपया ५३
त्वन्मायामोहितधियस्त्वां न जानन्ति तत्त्वतः । मानुषं त्वाभिमन्यन्ते मायिनं परमेश्वर ५४
आकाशवत्त्वं सर्वत्र बहिरन्तर्गतोऽमलः । असंगो ह्यचलो नित्यः शुद्धो बुद्धः सदव्ययः ५५
योषिन्मूढाहमज्ञा ते न त्वं जानीकथं विभो । तस्मात्ते शततो राम नमस्कुर्यामनन्यधीः
५६

तिरिक्तमस्तीति ५३ नन्वीदृशोऽप्यहं हि लोको मां तथा किमिति न जानातीत्यत्राह त्वन्माय
येति त्वन्मोहितविषययायेत्यर्थः तदुक्तं विष्णुपुराणे माहात्म्यं जगत्सर्वं सदेवासुरमानुषं अवि
द्यामोहितात्मानः पुरुषा भिन्नदर्शिन इति ५४ ननु तर्हि तादृशाप्रवाहं नेत्याह आकाश
वदिति अचलो निष्क्रियः शुद्धो ज्ञानरूपः सत् सत्तारूपः नित्यत्वमनादित्वं अव्ययत्वमन
न्तत्वं ५५ मूढा नमो गुणप्रधाना अतएवाज्ञा नमस्कुर्यां त्वद्रूपज्ञानायेति भावः ५६ ॥ ३५

भक्तानिरंतरा ५७ पुरुषाध्यक्ष समकलपुरुषसाक्षिन हृषीकेश हृषीकाणामिंद्रिया-
णामधिष्ठातः हृष्यन्ति विषयैरिति हृषीकाणीन्द्रियाणि हृषीकेशाभयप्रदेति विस्मयमो-
क्षः भीतया हृल्ययैतन्नामस्मृत्वा नारजीवसमे हेऽयनस्यानेयस्यां तयामितयानन्वस्थित
त्वान्नारायणः नयतीति नरः प्रोक्तः परमात्मा सनातनः नराज्जातानि तत्त्वानि नाराणी-

देवमेयत्वक्कत्रापि स्थितायायां प्रसर्वदा त्वत्पादकमले भक्तिर्भक्ति देव सदा
त्वयि ५७ नमस्ते पुरुषाध्यक्ष नमस्ते भक्तवत्सल नमस्तेऽस्तु हृषीकेश
नारायण नमोऽस्तु ते ५८ भवभयहरमेकं भानुकोटिप्रकाशं करधृतशरचा-
पं कालमेघावभासं कनकरुचिरवस्त्रं रत्नवत्कुण्डलाढ्यं कमलविशदा-
नेत्रं सानुजं राममीडे ५९॥

तिनतोविडुः तान्ये वचायनं तस्यते तेन नारायणः स्म-
तद्वृत्तिमनः प्राणोनारान्तस्थितेनाह्वानारायणः अस्य मंत्रस्य संसारभयनाशकत्वात्स्म-
रणात् दुष्कृतं नृसिंहरूपाणां नारायणायनमस्त्वियमेव मत्र्ये संसारद्यौ व विषय संहरणायस-
त्वइति ५८ तदेवाह भवभयेति भवभयं संसारभयं कालमेघो नीलमेघः ५९ ॥ ॥

साचाहल्या पतिं गौतमं ६१ ६२ ६३ मातृभ्रातृत्यज्ञानेऽ भावश्चार्षः भोगैकबद्धः स्यात्

त्कैवेवं पुरुषं साक्षात्तुष्टाव पुरतः स्थितं परिक्रम्य प्रणम्याशु सानुज्ञाता ययौ प
तिं ६० अहल्यया कृतं स्तोत्रं यः पठेद्भक्तिसंयुतः स मुच्यतेऽखिलैः पापैः परं ब्र
ह्माधिगच्छति ६१ पुत्राद्यर्थे पठेद्भक्त्या रामं हृदि निधाय च संवत्सरेण लभ
ते वंध्याप्यपि सुपुत्रकं ६२ सर्वान्कामानवाप्नोति रामचंद्रप्रसादतः ६३ ब्र
ह्मघ्नो गुरुतल्पगोऽपि पुरुषः स्तेयी सुरापोऽपि वा मातृभ्रातृविहिंसकोऽपि स
ततं भोगैकबद्धातुरः नित्यं स्तोत्रमिदं जपन्रघुपतिं भक्त्या हृदिस्थं स्मरन्ध्या
यन्मुक्तिमुपैति किं पुनरसौ स्वाचारयुक्तो नरः ६४ ॥ इति श्रीमदध्यात्मरामा
यणे उमामहेश्वरसंवादे बालकांडे पंचमः सर्गः ५ ॥ ॥

र इति छेदः अत्र संधिरार्षः ६४ इत्यध्यात्मरामायणे बालकांडे टीकायां पंचमः सर्गः ५ ३९

विश्वामित्र इति वयं गच्छाम इति प्राहेत्यन्वयः बहुवचनादेव रामलक्ष्मणयोरपि गमनक
र्तृत्वं १ जनतेति त्यागमप्रयासनानित्ययज्ञादउभावः नाविकेन मोतावकेण २ दारुदृषदोः

सूत उवाच विश्वामित्रोऽथ तं प्राह राघवं सहलक्ष्मणं । गच्छामो वत्स मिथि
लां जनकेनाभिपालितां १ दृष्ट्वा क्रतुवरं पश्चादयोध्यां गंतुमर्हसि इत्युक्त्वा
प्रययौ गंगां मन्तुं ते सह राघवः तस्मिन्काले नाविकेन निषिद्धो रघुनंदनः २ ना
विक उवाच क्षालयामि तव पादपंकजं नाथ दारुदृषदोः किमंतरं मानुषीकर
णचूर्णमस्ति ते पादयोरिति कथा प्रथीयसी ३ पादांबुजं ते विमलं हि कृत्वा ।
पश्चात्परं तीरमहं नयामि नोचेत्तरी सद्युवती मलेन स्याच्चेद्विभो विद्धि कुटुं
बहानिः इत्युक्त्वा क्षालितौ पादौ परं तीरं ततो गताः कौशिको रघुनाथेन स
हितो मिथिलां ययौ ४ विदेहस्य पुरं प्राप्त ऋषिवाटं समाविशत् प्राप्तं कौशि
कमाकर्ण्य जनकोऽतिमुदान्वितः ५ पूजाद्रव्याणि संगृह्य सोपाध्यायः समाय
यौ दंडवत्प्रणिपत्याथ पूजयामास कौशिकं ६

काष्ठपाषाणयोः मानुषीकरणचू
र्णमिति शिलारूपायास्तस्याः पादस्पर्शमात्रेण मानुदेहसंपादनात् ३४ प्राप्तविदेहस्य पु
रं गत्वेति शेषः ऋषिस्थानमार्गं ५ सोपाध्यायः गौतमपुत्रशतानंदसहितः ६ ॥ ॥

श्री
अ० रा०
बा० टी०
३२

७ ८ ९ १० मेनोदितः मयाप्रेरित इत्यर्थः ११ १२ १३ ते एहेहि पूजितं धनुर्द्रष्टुकाम इहागतौ।

प्रभया कुर्वतौ दृष्ट्वा सर्वलक्षणसंयुतौ द्योतयन्तौ दिशः सर्वाश्चन्द्रसूर्याविवाप
रौ ७ कस्यैतौ नरशार्दूलौ पुत्रौ देवसुतोपमौ मनःप्रीतिकरौ मेऽद्य नरनाराय
णाविव ८ अथोवाच मुनिः प्रीतो हर्षयन् जनकं तदा पुत्रौ दशरथस्यैतौ भ्रातरौ
रामलक्ष्मणौ ९ मखसंरक्षणार्थाय मयानीतौ पितुः पुरात् आगच्छन्नाथवो मा
र्गे ताटकां विघ्नकारिणीं १० शरेणैकेन हतवान् नोदितो मेऽतिविक्रमः ततो
ममाश्रमं गत्वा मम यज्ञविहिंसकान् ॥ सुबाहुप्रमुखान् हत्वा मारीचं सा
गरेऽक्षिपत् ततो गङ्गातटे पुण्ये गौतमस्याश्रमे शुभे १२ गत्वा तत्र शिला
रूपा गौतमस्य वधूः स्थिता पादपङ्कजसंस्पर्शात् कृता मानुषरूपिणी १३
दृष्ट्वाहल्यां नमस्कृत्य तया सम्यक् प्रपूजितः इदानीं द्रष्टुकामस्ते गृहे हरध
नुः १४ पूजितो राजभिः सर्वैर्दृष्टमित्यनुशुश्रुवे १५ ॥

मागत इत्यन्वयः
१४ तच्च सर्वै राजभिर्दृष्टं दृष्टमेव न ताभ्यां दृष्टं तमित्यनुशुश्रुवे अनेन श्रुतमित्य ३२

दृष्टोत्वस्यधनुः कर्मयतः पितरं द्रष्टुमिच्छत्यतो योध्यां जिगामिषुरित्यन्वयः १५ मंत्रिणां

अतोऽदर्शयद्राजेंद्र शैवं चापमनुत्तमं दृष्ट्वायोध्यां जिगमिषुः पितरं द्रष्टुमिच्छ
ति १५ इत्युक्तो मुनिना राजा प्रजाहितो विदितः प्रजयः पूजयामास धर्मज्ञो विधि
दृष्टेन कर्मणा १६ ततः संप्रेषयामास मंत्रिणां बुद्धिमुत्तरं १७ जनक उवाच
पीठ्रेमानय विशेषचापं रामाय दर्शय ततो गतमंत्रिवरो राजा कौशिकमब्रवी
त् १८ यदि रामो धनुर्धन्वा कोट्यां तारोपयेद्गुणं १९ तदा मयात्मजा सीता दी
यते राघवाय हि तथेति कौशिको प्याह रामं संवीक्ष्य सस्मितं २० पीठ्रे दर्श
य चापाग्र्यं रामायामिततेजसे एवं ब्रुवति मौनीशे आगता चाष्टवाहकाः
२१ चापं गृहीत्वा बलिनः पंचसाहस्रसंख्यकाः घंटाशतसमायुक्तं मणिव
ज्रादिभूषितं २२ दर्शयामास रामाय मंत्री मंत्रवतां वरः दृष्ट्वा रामः प्रह
ष्टात्मा बध्वा परिकरं दृढं २३ गृहीत्वा वामहस्तेन लीलया तोलयन्धा
नुः आरोपयामास गुणं पश्यत्स्वखिलराजसु २४ ॥

सदामाख्यं १७ २० भोनीशोऽश्वमिश्रेष्ठे २१ २२ परिकरं कटिवस्त्रबंधः २३ गु
णज्या २४ ॥ ॥ ॥

श्री॰ अ॰ रा॰ बा॰ टी॰ ३७

अखिलप्रियसारः अखिलप्राणिनां हिरण्यगर्भादीनां सकलब्रह्मांडस्थानां प्रियसारो बलं
यस्य २५ मर्त्यमनुष्यलोके २६ २७ रत्नहृदहमालिंगवराजातिहृष्टो जातइति शेषः सी
तामातरो जनकपत्न्यः अतः पुराजिरे तदंगणे आगताः किमिति विस्मयवशादिति।

ईषदाकर्षयामास पाणिना दक्षिणेन सः बज्जं जाखिलहृत्सारो दिग्पाश्या
हृष्टनमृत्युन २५ दिशश्च विदिशश्चैव स्वर्गं मर्त्यं रसातलं तदद्भुतमभूत्तत्रा।
देवानादिविपक्षवतो २६ प्राल्हादयंतः कमसे दैवाल्कतिमिशीदृष दैवदुंदु
भयो नेदुर्ननृतुश्चाप्सरोगणाः २७ विधाभरयथनुर्हृष्टा राजानि ग्रवहृद
हृ विस्मयं लेभिरे सीतामातरोंतःपुराजिरे २८ सीता स्वर्णमयीं मालां गृ
हीत्वा दक्षिणे करे स्मितवक्त्रा स्वर्णवर्णा सर्वाभरणभूषिता २९ मुक्ताहा
रैः कर्णपत्रैः क्वणच्चलितनूपुरा २९ दुकूलपरिसंवीता वस्त्रांतर्व्यंजितस्त
नी रामस्योपरि निक्षिप्य स्मयमाना मुदं ययौ ३० ततो मम मदिरे सर्वे राजा।
दारास्वलेक्ष्य गवाक्षजालरंध्रेभ्यो दृष्ट्वा लोकविमोहनं ३१ ॥

भावः विस्मयमद्भुतरसं लेभिरे प्रापुः २८ स्मितवक्त्रा स्मितवदने ईषद्धास्ययच स्मितयुक्ते
वक्त्रे यस्याः सा कर्णपत्रैः कर्णभूषणैः उपलक्षितेति शेषः चलितनक्वणन्नूपुरौ ३१ ॥ ३७

यस्याः सा स्त्रार्थः समासः २९ निदिष्टेत्यस्मात्लोकर्मे ३० स्वकृतं लोकविमोहनं रामं द
ष्ट्वा मदि देवेति त्वन्वयः ३१ पत्रसंदेशप्रापकलेखवत्पुत्रसहितहननिष्यर्थः ३२ यथाग
गच्छति तथा पत्रं प्रेषयेत्यन्वयः सपुत्रकः भरतादिसहितः ३३ राजधानीहलेदथमथं रामस्य
यः विवाहहर्षं रामकृतं धनुर्भंगं ३४ राजानो रथस्थापतय इति मध्यमपदलोपी समासः ३६

ततोऽब्रवीन्मुनिं राजा सर्वशास्त्रविशारदः भो कौशिक मुनिश्रेष्ठ पत्रं प्रेषय सत्व
रं ३२ राजानः सपरिवाराः शीघ्रमागच्छन्तु सपुत्रकः विवाहार्थं कुमाराणां सदार
सहमंत्रिभिः ३३ तथेति प्रेषयामास दूतान् त्वरितविक्रमान् श्रुत्वा रामकृतं राजा
हर्षेण महताप्लुतः ३४ मिथिलागमनार्थाय त्वरयामास मंत्रिणः गच्छन्तु मिथि
लां सर्वे राजानश्च रथपत्तयः ३५ रथमानयमे शीघ्रं गच्छाम्यद्यैव माचिरं वसिष्ठस्त्व
ग्रतो यातु सदारसहितो मुनिः ३६ राममाता समादाय मुनिर्मे भगवान् गुरुः एवं
प्रस्थाप्य सकलं राजर्षिर्विपुलं रथं ३७ महत्या सेनया सार्द्धमारुह्य त्वरितो ययौ आ
गतं राघवं श्रुत्वा राजा हर्षसमाकुलः ३८ प्रत्युज्जगाम जनकः शतानन्दपुरोधसा

श्रुतिस्मृत्वेसेतां रामपाहेन रथिकानामेव ग्रहणेन रथ्यादीनाम नोत्पन्नदोषः य
तेपवसयामहस्त्य श्वरथपदातिमिति ति अल्यातरहूत्वस्य भाष्यप्रयोगाः सगच्छतेर
तितेः ३५ राममाता कौशल्याद्यः प्रस्थाप्य नगराद्बहिः संप्रेष्य रथमारुह्य तयेव सा
नयासार्द्धं ययाविन्यन्वयः ३७ शतानन्दपुरोधसा सहेति शेषः ययाशोकमहजनपायया

ओ

श्री॰ स॰ रा॰ वा॰ टी॰ ३९

पुलोर्बुजोपमं विकसितकमलसदृशं ४१ सुखानंदं गतः प्राप समाधाविति मोषः ४२ ४३
४४ वितानैर्वासः कृतमंगलासीदने मंडपोत्र विचित्रा हस्तशाला ४५ सहस्रवाये स्तंभैः संकीर्णे ४६
सुवासिन्यो जीवद्भर्तृकाः धनकोलकवकोलकमलोनिष्कवस्त्राविभूषणा इति कोशाहृताविः

रामस्तलक्ष्मणो नाम्नुवंदे चरणौ पितुः ततो हृष्टो दशरथो राममब्र
वीत् ५० दिष्ट्यापश्यामि ते राम मम खं पुलोर्बुजोपमं सुनेरव्ययहृत्सर्वं सपा
त्नेसमवोभवत् ५१ इत्युक्त्वा चाब्रवीत्सर्वान्मातालिंगनपूर्वं पुनः पुनः हर्षणामहृताविः
श्रेष्ठब्रह्मानंदं राजो यथा ५२ ततो जनककराजेन मंदिरे संनिवेशितः शोभने स
वैभोगाद्यैः सदारैः सुहृत्तः स्वयं ५३ शुभे दिने लग्ने सुमुहूर्ते रत्नहुतेन मे प्रा
नयामास यथार्मतो रामं सभ्रातृकं तदा ५४ रत्नलंभसुवितानैः सवितारसतोर
णे मंडपे सर्वशोभाढ्ये ससत्पुष्पफलान्विते ५५ वेदविद्भिः सुसंवादे ब्राह्म
णैः स्वर्णाभूषितैः सुवासिले पतिवतो निष्ककंटीभिराहूते ५६ भेरीडुंडुभिनि
वैर्घैषैगीतनृत्यसमाकुले ह्रिभिः सुरत्नार्चिते स्वर्णपीठे रामं न्यवेशायत् ५७
भूषणं निष्कतल्केटेयासुतांभिः भेरीडुंडुभीवाद्यविशेषै वितानस्त्रिच यष्टीर्यो ताव
तिलितो चर्मछत्र चतुर्विणाद्य गुलवदनदयाभेरीवतलश्च मवद्वे कानना डुंडुभि
रितिवदंति रत्नार्चिते रत्नखचिते ५७ ५८ ॥

वै

३९

रामस्योभयपार्श्वयोः स्थितं वसिष्ठं कौशिकं च यथाक्रमं पूर्वं वसिष्ठं ततः कौशिकमिति।
क्रमेणाभ्यर्च्य इत्यन्वयः ४८ सीतामानीय अग्रे कृत्वा सभार्यो जनको रामं प्रति प्रायात
वसिष्ठं कौशिकं चैव शतानंदः पुरोहितः यथाक्रमं पूजयित्वा रामस्योभयपा
र्श्वयोः ४८ स्थापयित्वा ततो अग्निं ज्वालयित्वा यथाविधि सीतामानीय शोभाढ्यां
नानारत्नविभूषितां ४९ सभार्यो जनकः प्रायात्काञ्चने राजीवलोचने पादौ प्रक्षा।
ल्य विधिवत्तदपो मूर्ध्न्यधारयत ५० या धृता मूर्ध्नि शर्वेण ब्रह्मणा मुनिभिः सदा
ततः सीतां करे धृत्वा साक्षतोदकपूर्वकं ५१ रामाय प्रददौ प्रीत्या पाणिग्रहविधा
नतः सीता कमलपत्राक्षी स्वर्णमुक्तादिभूषिता ५२ दीयते मे सुता तुभ्यं प्रीतो भ
व रघूत्तम इति प्रीतेन मनसा सीतां रामकरेऽर्पयत् ५३ सुमोद जनको लक्ष्मी
क्षीराब्धिरिव विष्णवे ऊर्मिलां चौरसीं कन्यां लक्ष्मणाय ददौ तदा ५४ तथैव।
श्रुतकीर्तिं च माण्डवीं भ्रातृकन्यके भरताय ददौ वे कां शत्रुघ्नायापरां ददौ ५५ चा
त्वारस्ते सपत्नीका भ्रातरः शुभलक्षणाः विरेजुः प्रभया सर्वे लोकपाला इवापरे ५६
ततोऽब्रवीद्वसिष्ठाय विश्वामित्राय मैथिलः जनकः स्वसुतोदंतं नारदेनाभिभाषितं ५७
इत्यन्वयः ४९ ५० याः गंगाख्याः ५१ ५२ सीतानाम्नी मे सुता तुभ्यं दीयते प्रीतो भवे
ति अनेन निष्कामतया भगवत्स्वीयते दानं कृतवानिति सूच्यते ५३ रामकरे सीतामर्प
यन् जनको लक्ष्मीं विष्णवे र्पयन् समुद्र इव मुमोद ५५ भ्रातृकन्यके कुशध्वजकन्यके

श्री:
प्र रा:
बा धे:
४:

सीताख्यातलांगलाग्रहतभूविवरात् ५८ पुत्रिकाभावेनभाविताम्प्राप्ता ५९ महतीमहती
मेना विश्वावसोस्तु बृहतीतुंबरोस्तु कलावती महतीनारदस्यस्यात्तस्यास्तु कच्छपीनते: ९० ९५२

यत्रभूमिविभ्रमध्येकर्षतोलांगलेनमे सीताख्यात्समुत्पन्नाकन्यकाशुभा
लक्षणा ५८ तामदात्सम हेप्रीत्या पुत्रिकाभावभाविता प्रपिताप्रियभार्याये
पुत्रचंद्रतिभानना ५९ एकदानारदोभ्यागाद्दिविक्तेमयिसंस्थिते रमायनम
हतीवीणांगायन्नारायणंविभुं ६० पूजितं सुखमासीनो मामुवाच सखोन्वि
तः शृणुमेवचनंगुह्यंतवाभ्युदयकारणं ६१ परमात्माहृषीकेशोभक्तानुग्रा
हकाम्यया देवकार्यार्थसिध्यर्थंरावणस्यवधायच ६२ जातोरामइतिख्यातो
मायामनुषवेषधृक् आस्तेदाशरथिर्भूत्वाचतुर्धापरमेश्वर: ६३ योगमाया
पिसीतेतिजातावैतववेश्मनि अतस्त्वंराघवायैवदेहिसीतांप्रियत्नतः ६४ नै
षापूर्वभार्येषा रामस्यपरमात्मनः इत्युक्त्वाप्रययौदेवगतिं देवमुनिस्तदा ६५
तदारभ्यमयासीताविलोलेत्सीविभाव्यते कथंमयाराघवायदीयतेजानकी
शुभा ६६ इतिचिंतासमाविष्ट:कार्यमेकमचिंतयं मत्पितामहसंवाहेशुन्यासमृद्ध

चतुर्धारामलक्ष्मणभरतशत्रुघ्नरूपेण ६३ ६४ पूर्वभार्या अनादिशक्तिः सेवविवाह
प्रभरणं दक्षभार्या देवगतिं देवलोकमार्गे ६५ पितामहस्याहोनेनदाद्यौवरणः ६८ ४

इति चिन्त्येत्येकं पदमिति लयो नान्वयपति इति विचार्य तथा कृतं प्रणाभूते तत्कृतं मित्यर्थः ६८ ८१
यत्प्रपश्यामि तेन मे जन्म सफलमित्यन्वयः ७० त्वत्पादांबुजं प्राप्य ७१ ७२ अधिरदिता अधिको

ईश्वरेण पुरादिष्टं प्रभु कृतावहास्तनं तत्ते धन्वे तत्प्राणं कार्यमिति चिंत्य कृतं तथा ६८ सा
तायापि प्रहार्य्याय सर्वेषां मानवानां त्वत्पादाम्बुजं श्रेष्ठ रामो राजीवलोचनः ६९
आगतोत्र धनुर्दण्डुं फालितो मम मनोरथः अद्य मे सफलं जन्म राम त्वां सह मीतया ७० प
कासनस्थं पश्यामि भ्राजमानं रविं यथा त्वत्पादांबुधरो ब्रह्मा हृष्टिचक्रप्रवर्तकः ७१
बलिस्त्वत्पादसलिलं धृत्वा भूद्दिविजाधिपः त्वत्पादपांसुसंस्पर्शादहल्या भर्तृशाप
तः ७२ सद्य एव विनिर्मुक्ता कोन्यस्त्वत्तोधिरदिता ७३ यत्पादपंकजपरागपवित्र
गात्रा योगीन्द्र देवजितं भवभयं जितकालचक्रैः यन्नामकीर्तनपराजितदुःखशोका
कादेवास्तमेव शरणं सततं प्रपद्ये ७४ ॥ ॥

रदितेनेत्यर्थः ७३ यस्य रामस्य पादपंकजपरागेण पवित्रं गात्रं येषां ते योगीन्द्रदेवैर्भवभयं
संसारभयं जितं देवाः यन्नामकीर्तनेन पराजितदुःखशोकाः जाता इति शेषः ७४ ॥॥

श्री· रा·
य
बा· टी·
प८१

दीनानामिति दीनारोहृयकैरर्त्थाविधात्याय विकीर्तितः सवर्णसम्मतितुमोभागेषहृयकइह्य
इतिविस्तरमोक्तः कात्यायनरत्नकार्षायणानवनिर्मित्वविनेयोधात्वकोवुधः तेद्वावषाकवर्णा
नदीनारक्तस्तिकःस्मृतइतिकार्षापणा दत्तिणास्यादिषाबोध्यः प्रवर्तते पणोनिवद्धः षूवेस्ये
षोडशोपणाः सवितिषोडशपणा हृय्यदत्तिणास्यः कार्षापणाइत्यर्थः अयुतंदशसहस्रं १७
इतिदत्त्वानृपःप्रादाद्वाचवायमहात्मने दीनाराणांकोटिशतंरथ्यान्नाम्ययुतंतथा
अश्वानांनियुतंप्रादाद्गजानांषट्शतंतथा पतीनांलक्षमेकंतुदासीनांनियुतंददौ २१
दिव्यांवराणिहारांश्चकक्ताभरणमेवच सीतायैजनकःप्रादात्प्रीत्यादुहितृवत्स
लः २२ वसिष्ठादीन्समंपूज्यभरतंलक्ष्मणंतथा पूजयित्वायथान्यायंतथादशरथं
नृपं २३ प्रस्थापययामासनृपोराजानंबंधुसत्तमं सीतामालिंग्यरुदतीमातरस्त्राश्रुलो
चना: २४ श्वश्रूशुश्रूषणपरानित्यंरामसमनुव्रता पातिव्रत्यमुपालंब्यतिष्ठवत्सेयथासु
खं २५ प्रयाणकालेरघुनंदनस्यभेरीमृदंगानकतूर्यघोषैः सर्वाभिभेरीघनतूर्यघोषैः
सन्मूर्छितोभून्नभयंकरोभूत् २६ इतिश्रीमदध्यात्मरामायणेबालकांडेषष्ठःसर्गः ६
नियुतंदशलक्षं २१ सक्ताभरणमयोजनलानुहारानित्यन्वयः २२ पूजयित्वायथोचितपतदा
नेत्यर्थः २३।२४ पातिव्रत्यंउपालंभ्यपुत्रपतिव्रताधर्मंमर्याद्दिनृलचनादिकंएवंवर्त्तेतितिष्ठेवा
ज्जितयामासेतिशेषः २५ आनकोडुंडुभिः तत्प्रभृतिनूर्यसर्वघोषः सर्वाभिनाभेयांदिषां
हि:सन्मूर्छितोमिश्रितः सेपाणिनांभयंकरोभूत वनेकास्यतालादि २६ इतिषष्ठःसर्गः

८५
श्री धा

मैथिलात मैथिलपुत घोराणि निमित्तानि अशुभसूचकाउत्पाताः १ २ ३ मृगा।

सूतउवाच अथगछतिश्रीरामेमैथिलाद्योजन।
त्रयं निमित्तान्यतिघोराणिददर्शनृपसत्तमः १ नत्वा
वसिष्ठंप्रपछकिमिदंमुनिपुंगवः निमित्तानिहदृश्यन्तेवि
षमाणिसमंततः २ वसिष्ठस्तमथप्राहभयमागामिसूच्य
पुनरप्यभयंतेद्यशीघ्रमेवभविष्यति ३ मृगाःप्रदक्षिणंयांति।
पश्यत्वाशुभसूचकाः इत्येवंवदतस्तस्यववौघोरतरोनिलः
।४ मुष्णंश्चक्षूंषिसर्वेषांपांसुवृष्टिभिरर्दयन् ततोव्रजन्ददृ
र्शाग्रेतेजोराशिंसमुपस्थितं कोटिसूर्यप्रतीकाशंविद्यु
त्पुञ्जसमप्रभं तेजोराशौददर्शाथजामदग्न्यं
प्रतापवान् ५ ॥

स्वांप्रदक्षिणंयांतिपश्यैतत्वन्वयः ४ मुष्णन्दर्शनशक्तिरहितानिकुर्वन् ५ ॥ ॥

श्री
अ रा
बाटी
५२

द अंतकं अंतकर्त्तारं कालमिव २८ ९ राजानमनादृत्य रहूत्तमं मत्वा चेत्यन्वयः मे नाम्ना
मदीयनाम्ना प्रसिद्धमत्र पृथ्वीं चरसि अतोस्मन्नामहारकत्वात्मच्छत्रुरसि एवमपि तत्रिय

नीलमेघनिभं प्राशुं जटामंडलमंडितं धनुःपरशुपाणिं च साक्षात्कालमिवांतकं
कार्तवीर्यांतकं रामं दृप्तक्षत्रियमर्दनं प्राप्तं दशरथस्याग्रे कालमृत्युमिवापरं
तं दृष्ट्वा भयसंत्रस्तो राजा दशरथस्तदा अर्घ्यादिपूजां विस्मृत्य त्राहि त्राहीति चाब्र-
वीत् ६ दंडवत्प्रणिपत्याह पुत्रप्राणान्प्रयच्छ मे इति ब्रुवंतं राजानमनादृत्य
रघूत्तमं ९ उवाच निष्ठुरं वाक्यं क्रोधात्प्रचलितेंद्रियः त्वं राम इति नाम्ना मे चर-
सि क्षत्रियाधम ९ द्वंद्वयुद्धं प्रयच्छाशु यदि त्वं क्षत्रियोसि वै पुराणं जर्जरं चापं
भक्त्वा त्वं कत्थसे मुधा ११ अस्मिंस्तु वैष्णवे चापे आरोपयसि चेद्गुणं तदा युद्धं
त्वया सार्द्धं करोमि रघुवंशज १२ नो चेत्सर्वान्हनिष्यामि क्षत्रियांतकरो
ह्यहं इति ब्रुवति वै तस्मिन्न चचाल वसुधा भृशं १३ ॥

त्वाभिमानश्चेत्तर्हि द्वंद्वयुद्धं प्रयच्छ ११ त्वयि युद्धायोद्यतेपि तावत्त्वपौरुषे यावत्तेपरी-
तां न प्राप्स्ये वैष्णवचापारोपणेन त्वद्बलं विज्ञाय त्वया योत्स्यामीत्याह तदा युद्धमि-
ति तत्र न त्वा सामर्थ्यं तत्त्वदीय सकलवधः प्रसक्त इति भावः १२ १३ ॥ ५२

सर्वेषामपि चक्षुषां सर्वसंबंधिचक्षुषामित्यर्थः १४ लुप्तंभेद्यं १६ लोकानतपोर्जितान्परलो
कानतिमितियावत् पादयुगं चरणयुगलं इहलोके तीर्थादिगतिमितियावत् समानत्रयत्वा
नेनस्वस्वरूपाविर्भावं सूचयति उक्तमेवार्थं स्फुटमाह अयमिति यथा त्वया अप्रथितदनंतव

अधिकारो बभूवाथ सर्वेषामपि चक्षुषां रामो दाशरथिर्वीरो वीनीत्पतं भार्गवं हतां १४
धनुर्वाहिक्षेपत्तद्धस्तात्तारोप्यगुणं रंजसा तूणीराद्वाणमादाय संधायाहत्यब्रवीयवा
नु १५ उवाच भार्गवं रामं शृणु ब्रह्मन्वचो मम लब्धं दर्पाय बाणास्य रूपमाचो ममस्ता
यकः १६ लोकान पादयुगं वापि वदर्शीघ्रं ममान्तया अयं लोकः परो वाप्यन्वयाग
न्तुंन शाक्यते १७ एवं ब्राह्मिकतं यं वदर्शीघ्रं ममान्तया एवं वदति श्रीरामे भार्ग
वो पि विहताननः १८ संस्मरन्पूर्ववृत्तांतमिदं वचनमब्रवीत् राम राम महाबाहो जा
नीत्वां परमेश्वरम् १९ पुराणपुरुषं विष्णुं जगत्सर्गलयोद्भवं वाल्येहं तप
सा विष्णुमाराधयितमंजसा २० ॥

अयं लोकः परो वा गंतुं न शक्यते एवं तथान्वो
प्रतिपकतं यं मम वर्तते तच्छीघ्रं वदेत्यर्थः १७ विहताननः प्राप्तपराभवत्वादिति शेषः १८
१९ पुराणपुरुषं अनादित्वात् नवदा सर्वदेहे शेषायनाच्च विष्णुं व्यापकं अंतर्बहिश्च सर्वत्र प्र
विष्टं वा जगत्सर्गलयोद्भवं जगतः सृष्टिसंहारस्थितयो यस्मात्तयो यस्मात्तं २० ॥ ॥ ॥

फलितं फलसमर्थं जातं मद्विदंशेन मद्धृयचिदाश्रयधान्यंशेन २२ तपसः श्रमः तपोरूपः
श्रमः शाहोसी इतिवत् २४।२५ यस्यायां मयात्वयि विद्यमानायां ज्ञानांशात् अधिकया शक्त्या तत्तोद
र्शनानं तत् मया त्वयि दत्तमेतेजः पुराय दाधुन रादास्यत देत्यन्वयः २६ ब्रह्मणो दिनं च तत्युगं

चक्रतीर्थे स्तुभंगात्वात् तपसा विष्णुमन्वहं अतोषयं महात्मानं नारायणमव्ययी २१
ततः प्रसन्नो देवेशः शंखचक्रगदाधरः उवाच मां रघुश्रेष्ठ प्रसन्नस्त्वं पंकजः श्री
भगवानुवाच जामदग्न्य तपसो ब्रह्मन् फलितं तपो महत् मच्चिदंशेन युक्तस्त्वं हत्वा त
त्रिपुङ्गवं २३ कार्तवीर्यं पितृहणं यदर्थं तपसाश्रमः ततस्त्रिः सप्तकृत्वस्त्वं हत्वा त
त्रियमंडलं २४ कृत्स्नां भूमिं कश्यपाय दत्वा शांतिमुपावह त्रेतामुखे दाशरथिर्भूत्वा
रामो हमव्ययः उत्पत्स्ये परया शक्त्या तदा द्रक्ष्यसि ततः मत्तेजः पुनरादास्ये त्वयि दत्तं मया
पुरा २५ तदा तपश्चरंल्लोके तिष्ठत्वं ब्रह्मणो दिनं इत्युक्त्वांतर्दधे देव तथा सर्वं कृतं मया २२
तपस्विस्त्वं राम जातोसि ब्रह्मणार्थितः मयि स्थितं तत्त्वं मे तेजस्त्वय्येव पुनरादृतं २
अग्रयमेकफलेनाम्न मतीतोसि मम प्रभो ब्रह्मादिभिरलभ्यस्त्वं प्रकृतेः पारगो मतः २६

सहस्राब्दं २७ स यदुपुत्रामस्मवरद एव २८ ममप्रतीतोसि मया प्रत्यभिज्ञातोसीत्यर्थः नन्वस्म
त्वभिज्ञायाः किमेवं दौर्लभ्यं येनैवमुच्यते ब्रह्मादिभिरिति तदलभ्यत्वे हेतुः प्रकृतेः पार

५३

जन्मादिषड्भावः जायते अस्ति विपरिणमते वर्धते क्षीयते नश्यतीत्येवं रूपाः षड्भावविकाराः तत्पदलक्ष्यभूतोऽसौ तेन नास्ति तान् न संभवा अस्त त्वयि न संति अतस्त्वमिति निर्विकारोऽसि मनआदिविवर्जितश्चासि ३ ननु तेजोहरणादिक्रिया यावद्ग्राहि इदानीमेव भोः कथं निष्क्रियत्वमत आह यथेति यथा गृहे पङ्कजलादि औपाधिकं तथा त्वयि क्रियौपाधिकोऽयमर्थः उपाधिमेवाह त्वदाधारेति अन्यान्यतिरिक्तमाह त्वाणीति त्वद्विषया स्वव्यतिरेकतया त्वदधीनमात्र त्वदाधारा च मेति भावः ४। उक्तत्वद्विषयत्वमेव दर्शयति यावदिति सा कुतस्तत्राह अविचारितसिद्धेति अनादिसिद्धाः

त्वयि जन्मादिषड्भावा न संत्यतस्तु न संभवा निर्विकारोऽसि पूर्णस्त्वं मनआदिविवर्जितः ३
यथा जले फेनजालं धूमो वह्नौ तथा त्वयि त्वदाधारा त्वद्विषया माया कार्यं जगत्प्रभो ४
यावन्मायावृता लोकास्तावत्त्वां न विजानते अविचारितसिद्धैषा विद्याविद्याविरोधिनी ५
अविद्याकृतदेहादिसंघाते प्रतिबिंबिता चिच्छक्तिर्जीवलोकेऽस्मिन् जीव इत्यभिधीयते ६

विचारणीयसिद्धेति अनादिरित्यर्थः सैव माया विद्या ब्रह्मज्ञानं तद्विरोधिनी तस्मिन् सति न भवति तद्गच्छति प्रतिभाति चातोऽविद्यापदेनोच्यत इत्यर्थः विद्याविद्येत्यत्र तिर्यो ते एकाचा नूयियोर्हितेत्यत्र इति अभियुक्ताः ५ कार्यं जगत्प्रभो इत्युक्तं तत्कार्यं दर्शयति अविद्येति आदिनांतर्गत तत्संघातावच्छिन्नेन करणेन प्रतिबिंबिता अनिर्वाच्येन संबंधसंबंधेन सा च ह्यचिच्छक्तिः प्राणादिप्रवर्तकत्वेन प्राणधारक तया जीव इत्युच्यते जीव प्राणधारणे इ

श्रीः
अ. टी.
बो. टी.
५४

ननु चित्कूटस्थयोरविवेकेन जीवे कर्तृत्वादिव्यवहारः कथमत आह यावदिति अभिमानोऽहमिति बु-
द्धिः यावद्विवेकाभावमूलको देहादिष्वात्मत्वाभिमानस्तावत्कर्तृत्वाद्यारोपेण तद्धानि वेत्य-
र्थः ३४ विशिष्टे एव कर्तृत्वादौ तूक्तमर्थं स्पष्टयति तद्विषयेण हेतु इति आत्मन इति संसृ-
तिः कर्तृत्वभोक्तृत्वाद्यभिमानकृतः संसारो नास्ति अपरिणामित्वादिति भावः एवं बुद्धेर्ना-
ऽप्यजडत्वादिति भावः तस्मात् द्वयं युक्त्वाऽहमिति बुध्या गृहीत्वात् देहाद्यविवेकः संसारी
जीवः इति अहंकर्ताभोक्तेत्यादिरूपेण प्रवर्तते व्यवहरतीति तदुक्तं न बुद्धेरवबोधोऽस्ति ना-

यावद्देहमनःप्राणबुद्ध्यादिष्वभिमानवान्। तावत्कर्तृत्वभोक्तृत्वसुखदुःखादिभा-
ग्भवेत् ३४ आत्मनः संसृतिर्नास्ति बुद्धेर्ज्ञानं न जात्विति। अविवेकाद्द्वयं युक्त्वा
संसारीति प्रवर्तते ३५ जडस्य चित्समायोगाच्चित्त्वं भूयाच्चितेस्तथा। जडसंगाज्ज-
डत्वं हि जलाग्न्योर्मिलनं तथा ३६॥

त्मनो विद्यते क्रिया च तोऽनान्यतरस्यापि ज्ञातीति यु-
ज्यत इति ३५ नन्वेवं बुद्धेश्चितौ संज्ञान इति भ्रान्तिमात्रं चितश्च व्यवहारानुपपत्तिरत आह
जडस्येति नन्वेवमसंगत इति व्यवहारानुपपत्तिरत आह तथा चिते जडसंयोगाज्जडत्वं मा-
लिन्येन मिथोऽन्यान्यधर्मप्रतिभासं दृष्टान्तमाह जलाग्न्योर्मेलनं विद्युज्जलयोर्यथेत्यर्थः विद्युतः
प्रकाशज्ञानमपि मलं स्वात्मगुणोऽपि जलस्वरूपं जडमपि जलं स्वात्मगुणो जलस्वरूपं जडमपि
अग्निसंयोगाद्विद्युद्रूपेण प्रकाशरूपतां प्राप्नोतीत्यर्थः ३६ ॥

५५

नत्वेवंयदिसंसृतस्तर्हिकथंमुच्यतेतत्राह यावदिति संगंसौख्यंसंगाज्जायमानंसुखंन
विंदतितत्प्राप्नोतितावदित्यर्थः सौख्यमितिस्वार्थेष्यञ् तिवनेहितिपरस्मैपदमार्षं ३७
सतांसंगेनलब्धयाभक्त्यायदाजनाः समुपासतेतदातेभ्योमायाशनैर्मेदृयाति अपस्म
तिविहायपाक्तित्यजतीत्यर्थः अतएवमातानवंप्रतिपद्यते ३८ तवज्ञानमभेदेनयत्त्त तद्गु

यावत्त्वत्पादभक्तानांसंगंसौख्येननविंदति तावत्संसारदुःखौघान्नतरः
सदा ३७ सत्संगलब्धयाभक्त्यायदात्वांसमुपासते तदामायाशनैर्याति
तानवंप्रतिपद्यते ३८ ततस्त्वज्ज्ञानसंपन्नःसद्गुरुस्तेनलभ्यते वाक्य
ज्ञानंगुरोर्लब्ध्वात्वत्प्रसादाद्विमुच्यते ३९ तस्मात्त्वद्भक्तिहीनानांकल्प
कल्पकोटिशतेरपि नमुक्तिशंकाविज्ञानैवसुखं...... तथा ४० ॥ ॥

क्तः सद्गुरुस्तद्भक्तियायागतेनलभ्यते तदनंतरंतादृशाद्गुरोःसकाशात्तुवाक्यज्ञानंतत्त्वमसीति
वाक्यार्थाववोधंतदनंतरंत्वत्प्रसादाल्लब्ध्वाविमुच्यते आचार्यवान्पुरुषोवेदेतिश्रुतेउपदेक्ष्यंति
तेज्ञानंज्ञानिनस्तत्त्वदर्शिनइतिस्मृतेश्च ३९ मुक्तिशंकामुक्तिप्राप्तिसंभावनापिनसुखंतथाने

॥ अ ॥ ॐ चि हि व

श्री
अ रा
बा टी
४५

भक्तिकारणं भक्तिमत्संगः याभ्यां भक्तिमत्संगात्तज्जन्यभक्तिभ्यामविद्यामायात्यत्परं परयावृति
लिवानश्यति ४१ त्वद्धर्मसत्त्वज्ञानेन तद्रूपामृतवर्षणशीलास्तदुपदेशवर्षैस्तेषां तन्मत्थेसि
द्धं ४२ कारुणिकेति संबोधनं प्रकृतोपयोगाय ४३ तव बाणाय भूयात् बाणेनास्य भूया

अतस्त्वत्पादयुगले भक्तिर्मे जन्मजन्मनि स्यात्त्वद्भक्तिमतां संगोऽविद्या याभ्यां विन
श्यति ४१ लोके त्वद्भक्तिनिरतास्त्वद्धर्मामृतवर्षिणः पुनन्ति लोकमखिलं किं पु
नः स्वकुलोद्भवान् ४२ नमोऽस्तु जगतां नाथ नमस्ते भक्तिभावन नमः कारुणि
कानन्त रामचन्द्र नमोऽस्तु ते ४३ देव यत्कृतं पुण्यं मया लोकजिगीषया तत्सर्वं
तव बाणाय भूयाद्राम नमोऽस्तु ते ४४ ततः प्रसन्नो भगवान् श्रीरामः करुणामयः
प्रसन्नोऽस्मि तव ब्रह्मन् यत्ते मनसि वर्तते ४५ दास्ये तदखिलं कामं मा कुरुष्वात्र सं
शयं ततः प्रीतेन मनसा भार्गवो राममब्रवीत् ४६ यदि मेऽनुग्रहो राम तवास्ति
मधुसूदन। त्वद्भक्तसंगस्त्वत्पादे दृढा भक्तिः सदास्तु मे ४७ ॥

दित्यर्थः अनेन सर्वकर्मक्षयेण भक्तिं देहीति व्यंग्यं ४४ तद्व्यंग्यं बुध्वा तद्दानं भगवान्प्रति
जानीते तत इत्यादि ४५ सर्वत्वत्कामं दास्ये ४६ सोऽपि भक्तिकारणं सत्संगं प्रार्थयते यदीति ४५
मधुसूदनेन मोक्षप्रतिबंधकमनुकर्मनाशने त्वं समर्थ इति व्यज्यते ४७ ॥

विज्ञानवदभेदसाक्षात्कारः इदं भक्तिफलं यदि कदाचिदिदं न स्यात्तर्हि अन्ते मरणकाले तव स्मृतिरेव वा भूयादिति लोकोपकाराय प्रार्थ्यते अन्ते या मतिः सा गतिरिति न्यायात्।

स्तोत्रमेतत्पठेद्यस्तु भक्तिहीनोपि सर्वदा त्वद्भक्तिस्तस्य विज्ञानं भूयादन्ते स्मृतिस्तव ४८ तथेति राघवेणोक्तः परिक्रम्य प्रणम्य तं पूजितस्तदनुज्ञातो महेन्द्रोचलमन्वगात् ४९ राजा दशरथो हृष्टो रामं कृतमिवागतं आलिंग्यालिंग्य हर्षेण नेत्राभ्यां जलमुत्सृजत् ५० ततः प्रीतेन मनसा स्वस्थचित्तः पुरंजयौ रामलक्ष्मणौ प्राञ्जलिभरतादेवस्मिताः ५१॥

ते त्वस्मत्तो न लाभो वा सम्भावीति भावः ४८ ४९ कृतमिवागतं तत्क्रियकालं त्वकाम्यनाव तेनेन तथा सम्भावने उत्सृजत् उदसृजदित्यर्थः अडभाव आर्षः ५० देवसंमिताः देवतुल्याः।

३

हि

प्री॰
अ॰ रा॰
बा॰टी॰
५९

युधाजितं संसृज्य भरतं शत्रुघ्नं चापि प्रेषयामास सेत्यन्वयः ५४ पौलोम्या पुलोमापत्यभूत-
या शच्या शक्रेण च देवमातेवेत्यर्थः ५५ साकेते अयोध्यायां लोकनाथैश्च प्रार्थिताः प्र

स्वां स्वां भार्यामुपादाय ······ रेमतुः स्वमंदिरे मातापितृभ्यां संहृष्टो रामः सीतास-
मन्वितः ५२ रेमे वैकुंठभवने श्रिया सह यथा हरिः युधाजिन्मामकैकेयीभ्राता
भरतमातुलः भरतं नेतुमागत्य तत्र राज्ये प्रीतिसंयुतः ५३ प्रेषयामास भरतं
राजा स्नेहसमन्वितः शत्रुघ्नं चापि संसृज्य युधाजितमरिंदमः ५४ कौशल्या
सुप्रभे देवी रामेण सह सीतया देवमातेव पौलोम्या शच्या शक्रेण शोभ-
ना ५५ साकेते लोकनाथप्रथितगुणगणो ला
कसंगीतकीर्ति श्रीरामः सीतयास्ते
विलसन्नतिकृतानंदसंदोह
मूर्तिः

सिद्धा गुणगणा यस्य सः लोकैः सम्यग्गीता कीर्तिर्यस्य सकलजनसंदोहस्यानंदसंदो-
हरूपा मूर्तिर्यस्य सर्वतः पानशरणानंदत्वात्तस्येति भावः ॥ ॥ ५९

श्री
रा
मा
बा
४७

नित्यश्रीः पराशक्तिर्यस्य अतएवनिरवधिविभवः नित्यंमायायाआवरणशक्तिरूपाया
निरासोयस्मात मायासर्वथार्थप्रत्यनावविकेतिभावः मायाकार्यंसर्वमनुसरति।

नित्यश्रीर्निर्विकारोनिरवधिविभवोनित्यमा
यानिरासोमायाकार्यानुसारीमनुजइवसदा।
भातिदेवोविविलेषाः ५९ ॥ इतिश्रीमदध्या।
त्मरामायणेबालकांडेउमामहेश्वरसंवादसप्त
मःसर्गः इतिबालकांडेसमाप्त श्रीमहा
देवउवाच एकदासुखमासीनंरामं
स्वांतःपुराजिरे सर्वाभरणसं
पन्नरत्नसिंहासनेस्थितं ॥१॥

सतास्फूर्तिर्भांवमातोतितात्पर्यः देवोपिअविलेषोपिमाययैवयोमनुइवभाति ५९
इतिश्रीमदध्यात्मरामायणेबालकांडेटीकायांसप्तमःसर्गः ॥७॥ ॐशुभम॥ ४७

अध्यात्म रामायण बालकाण्ड ; अपूर्ण
४७ पत्रक ॥ ल० म० १४ पं० ज० दृ०

ह० ल०